1712
Digitized by Arya Samaj Foundation Chennai and eGangotri

THE

KÂSHÎ-SANSKRIT-SERIES

(HARIDÂS SANSKRIT GRANTHAMĀLĀ)

132.

(Veda Section, No. 8.)

महर्षिशौनकोक्तम् ।

चरणव्यूहसूत्रम् ।

वैदिकशिरोमणि आचार्यमहिदासकृत-
भाष्यसहितम् ।

PUBLISHED BY

JAYA KRISHNADAS—HARIDAS GUPTA,

The Chowkhamba Sanskrit Series Office,

BENARES.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

THE

KASHI SANSKRIT SERIES

(*HARIDAS SANSKRIT GRANTHAMALA*)

132.

(Veda Section No. 8.)

THE

Charaṇavyuha Sūtra

OF

S'AUNAKA

WITH THE COMMENTARY OF MAHIDĀSA

Edited with Introduction and Critical notes etc.,

BY

VEDĀCHĀRYA

PT. ANANTARĀM DOGĀRĀ S'ĀSTRI.

PUBLISHED BY

JAYA KRISHNA DÂS HARI DÂS GUPTA

The Chowkhambâ Sanskrit Series Office.

Benares City.

1938

[*All Rights Reserved by the Publishers.*]

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Registered According to Act XXV of 1867.
All Rights Reserved by the Publishers.

PRINTED BY
JAYA KRISHNA DAS GUPTA,
VIDYA VILAS PRESS, BENARES CITY.
1938.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशी-संस्कृत-सीरिज़पुस्तकमालायाः
१३२
वेदविभागे (८) अष्टमं पुष्पम् ।

महर्षिशौनकोक्तम्

चरणव्यूहसूत्रम् ।

वैदिकशिरोमणि आचार्यमहिदासकृत
भाष्यसहितम् ।

'वेदाचार्य' डोगरा-अनन्तरामशास्त्रिणा
टिप्पण्यापरिष्कृत्य संशोधितम् ।

यदुवंश वैदिक पुस्तकालय
संख्या 719
दिनांक 12/12/72
लालबाग फैजाबाद उ० प्र०

प्रकाशकः—
जयकृष्णदास-हरिदास गुप्तः-
चौखम्बा संस्कृत सीरिज़ आफिस
विद्याविलास प्रेस, बनारस सिटी ।

१९९५

[अस्य पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकायत्ताः]

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसद्गुरवे नमः ।

भूमिका ।

श्रीविश्वेश्वरकृपयाऽद्य चिरत्नो निबन्धः 'चरणव्यूह' नामा सर्वदेशीयैर्ऋग्वेदि-यजुर्वेदि-सामवेदि-अथर्ववेदिभिः समादृतो यथानाम प्रमाणित वेदराशेः चतुर्विभाग, वेदानां विस्तार, आचार्यानुपूर्वी, शाखा-सूत्रादिभेद, जटादि विकृति, ऋग्यजुर्गानादिसङ्ख्या, मन्त्र-पद-वेष्टनादिसङ्ख्या, एकपदाद्विपदादिभेद, हवने-अध्ययने ऋक्परिमाण, पारायणविध्यादि विषयख्यापकः पुनर्मुद्रापयित्वा प्राकाश्यंनीतः ।

निर्माताऽस्य महर्षि शौनकाचार्यः । भाष्यकर्ताऽस्य वैदिकशिरोमणिराचार्यप्रवरो महिदासशर्मा ।

एष चरणव्यूहः पुरा विद्याविलासयन्त्रालये शिलाक्षरयन्त्रालये च मुद्रापयित्वा प्रकाशितोऽप्यति अशुद्ध इतिपुनरस्य परिशोधनपूर्वकम्मुद्रापणमभिलष्यद्भिः काशिक-चौखम्बा-पुस्तकालयाध्यक्षैर्जयकृष्णदासगुप्तमहोदयैरभ्यर्थितोऽहं सहायकपुस्तके आसाद्य संशोध्य टिप्पण्यासमलमकाष प्रार्पयञ्च तस्मै पुनर्मुद्रापयितुम् ।

अस्य संशोधने-प्रथमं 'महथापुस्तकालयीयं' अस्मदीयमतिप्राचीनं पुस्तकं द्वितीयं श्रीविनायकशास्त्रि बहेड़े महोदयीयं पुस्तकमिति विदाङ्कुर्वन्तु भवन्तः ।

अस्मिन्महतिकार्ये पर्वतीय श्रीमद्भिः पं० गङ्गादत्त 'घनपाठी' महोदयैरष्टानां विकृतीनां प्रदानेन कृतं साहाय्यकं तथा ऋग्वेदिवर्यैः श्रीमद्भिः रामचद्र अठावले महोदयैः 'ऐतरेयब्राह्मणादि' पुस्तकप्रदानादिभिः कृतं साहाय्यकं पुनर्पुनः धन्यवादपूर्वकं स्मरामि ।

आशासे चायं निबन्धः पठनपाठनप्रणालिकायां प्रचार्य तत्तद्विद्यालयप्रधानाध्यक्षाः प्रकाशकसमुत्साहं वर्धयिष्यन्तीति ।

डोगराभवनम्
मीरघाट, काशी

श्रीमतामनुचरः-
अनन्तरामडोगराशास्त्री

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसद्गुरवे नमः ।

अथ शौनकोक्तम्—

चरणव्यूहपरिशिष्टं सभाष्यं प्रारभ्यते ।

श्रीगणेशाय नमः ।

अथातश्चरणव्यूहं व्याख्यास्यामः ॥ १ ॥

(नत्वा श्रीशमुमेशं च गणेशं श्रीयुतं गुरुम् ।
शाखादेरिदमाख्यानं क्रियतेऽन्वेष्य यत्नतः ॥ १ ॥
यथाऽनादिर्हरिः ख्यातो निदानं जगतां परम् ।
तथा वेदोऽपि शास्त्राणां स्मृत्यादीनां महाशयः ॥ २ ॥
तमगाधं च को वेत्ति विस्तीर्णत्वं विनेश्वरम् ।
तस्मात्सङ्क्षेपतो वक्ष्ये वैदिकादिमुदे मुदा ॥ ३ ॥)
ओमित्येकाक्षरं ब्रह्म नादबिन्दुकलात्मकम् ।
त्रिदेवत्वं त्रिमात्रं च स्फुटं विष्णुं सनातनम् ॥ ४ ॥
तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ।
वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥ ५ ॥
कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ।
येन चरणव्यूहेषु शाखाभेदमितं कृतम् ॥ ६ ॥
तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम् ।
नत्वा तु शाकलाचार्यं तथैव चाश्वलायनम् ॥ ७ ॥
एवं परम्पराप्राप्तं बालकृष्णं महागुरुम् ।
यस्य प्रसादाद्व्याख्यामि चरणव्यूहसञ्ज्ञकम् ॥ ८ ॥

'अथ'शब्दो मङ्गले प्रस्तावे च'। 'अथ'शब्दः पूर्वमेव मङ्गलार्थं इत्यर्थः । अतः हेत्वर्थः । चरणव्यूहः । वेदराशेः चतुर्विभागाच्चरण

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्यते। तस्य व्यूहः समुदायः। चतुर्वेदानां समुदायं व्याख्या-स्याम इत्यर्थः। कथमेकवेदः? तदुक्तमारण्यके-"सर्वे वेदा सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्" (ऐ० आर० २ खं० १०) इति। तस्य चतुर्विभागाः कृताः। तथा चोक्तं द्वादशस्कन्धे षष्ठाध्याये भागवते—

तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैः प्रभुः।
सव्याहृतिकान्त्सोङ्कारांश्चातुर्होत्र(१)विचक्षणाः॥ १॥
पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान्।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्॥ २॥
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः।
चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः॥ ३॥
क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः।
वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः॥ ४॥
अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये॥ ५॥
पराशरात्सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्॥ ६॥
ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव॥ ७॥
तासां स चतुरः शिष्यानुपाहूय महामतिः।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः॥ ८॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह।
वैशम्पायनसञ्ज्ञाय निगदाख्यं यजुर्गणम्॥ ९॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे॥१०॥

---

(१) 'विचक्षया' इ० पा०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पैलः स्वां संहितामूच इन्द्रप्रमितये मुनिः ।
बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥११॥
चतुर्द्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ।
पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान् ॥ १२ ॥
अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ।
तस्य शिष्यो वेदमित्रः सौभर्यादिभ्य ऊचिवान् ॥ १३ ॥
शाकल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ।
वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ १४ ॥
जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ १५ ॥
बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ।
चक्रे बालाय निर्भज्य कासारश्चैव तां दधुः ॥ १६ ॥
बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ।
श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ १७ ॥

अस्यार्थः—व्यासात्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा इन्द्रप्रमितये ददौ । इन्द्रप्रमितिश्चतुर्धा जटान्तं व्यासं कृत्वा बाष्कलादि अग्निमित्रान्तषट्शिष्येभ्यः स्वसुताय माण्डूकेयाय च ददौ । माण्डूकेयस्य शिष्यो वेदमित्रस्तस्य पुत्रेभ्यः सौभर्यादिभ्यस्तैः स्वसुताय शाकल्याय ददौ । शाकल्यः संहितापदक्रमजटादण्डरूपं च पञ्चधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोखल्याशिशिरेभ्यो ददौ । शाकल्याशिष्यो जातूकर्ण्यः सनिरुक्तां संहितां बलाकपैजवैतालाविरजेभ्यो ददौ । पूर्वोक्तबाष्कलपुत्रो बाष्कालिः पूर्वोक्त सर्वशाखाभ्य उद्धृत्य बालखिल्याख्यसंहितां चक्रे । तां नाम्नीं बालखिल्यसंहितां बालायनिप्रभृतयोऽधीतवन्तः । इति पदेषु संहितात्वमितिकरणवेष्टनं, उदात्तानुदात्तस्वरितस्वराणां सिद्धिः, एतच्छन्दसां व्यासं विस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च विष्णुपुराणे—

ब्रह्मणा चोदितो व्यासो वेदान्व्यस्तु प्रचक्रमे ।
अथ शिष्यात्स जग्राह चतुरो वेदपारगान् ॥ १ ॥
ऋग्वेदश्रावकं पैलं सञ्जग्राह महामतिः ।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥ २ ॥
जैमिनिः सामवेदस्य तथैवाथर्ववेदवित् ।
सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः ॥ ३ ॥

तथा च गृह्यसूत्रम्—"सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या"(आ० गृ० सू० ३ अ० ४ खं०) इति । 'जानन्ति बाहवी' इत्यारभ्य 'माण्डूकेया'(आ० गृ० सू० ३ अ० ४ खं०) इत्यन्तं माण्डूकगणसमुदायः । 'गर्गी वाचक्नवी' इत्यारभ्य 'शाङ्खायनम्'(आ० गृ० सू० ३ अ० ४ खं०) इत्यन्तेन शाङ्खायनगणः । एतेषां कौषीतकिब्राह्मणमारण्यकं शाङ्खायनसूत्रं चेति । 'ऐतरेयम्' इत्यारभ्य 'आश्वलायनम्'(आ० गृ० सू० ३ अ ४ खं०) इत्यन्ता आश्वलायनगणः । एषामैतरेयब्राह्मणमारण्यकमाश्वलायनसूत्रं चेत्यर्थः ॥ १ ॥

तत्र यदुक्तं चातुर्वैद्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

अस्मिन् ग्रन्थे यदुक्तं चातुर्वैद्यं तेन चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ॥ ३ ॥

इति स्पष्टार्थः । "वेदा हि यज्ञार्थमभिप्रवृत्ताः" (श्रीलगधज्योतिष ७ खं०) । तथा च विष्णुपुराणम्—

आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः ।
ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥
अत्रैव मत्सुतो व्यास अष्टाविंशतिमेऽन्तरे ।
वेदमेकं चतुष्पादश्चतुर्धा व्यभजत्प्रभुः ॥ २ ॥ इति ।

अस्यार्थः—आद्यो वेदो वेदविभागात्पूर्वकालीनो वेद-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्चतुष्पादः(१) ऋगादिचतुष्टयसमूहरूपः। शतसाहस्रसम्मितः। "दश दश तच्छतं दशशतानि, तत्साहस्रं तत्सर्वम्"इति श्रुतेः। अनन्त-सङ्ख्याकः। "अनन्ता वै वेदा" इति श्रुतेः। ततो वेदात्प्रवृत्तः कृ-त्स्नोऽयं दशगुणः—दशविधः। "स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम"(ऐ० आर० २ खं० १.५) इति श्रुतेः। तथा च—"पञ्च वा एते महायज्ञा" इत्युपक्रम्य "ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञ"इति श्रुतेश्च। वैतानिका गार्ह्याश्च दशयज्ञाः। अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविं-शतिमे द्वापरयुगे इति शेषः। मत्सुतो व्यासः कृष्णद्वैपायन श्चतुर्धा व्यभजत्। ऋग्वेदादिरूपेण चतुर्धा विभक्तवान्। पाकयज्ञास्त्रिविधाः। अत्रगृह्यम्—"हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः" (आ० गृ० सू० १ खं०) इति। अत्र वृत्तिकृत्—अग्नौ हूयमाना 'हविष्यस्य जुहुयात्' इत्येव-माद्यो हुताः। अनग्नौ क्रियमाणा 'अथ बलिहरणम्' इत्येव माद-यः प्रहुताः। ब्राह्मणभोजनं यत्रास्ति 'ब्राह्मणान्भोजयित्वा' इति ब्र-ह्माणि हुताः इति। नित्याभ्यासो ब्रह्मयज्ञः पारायणं च। अत्र गृ-ह्यसूत्रम्, ब्रह्मयज्ञखण्डे-यदृचोऽधीते पय आहुतिभिरेव तद्देवतास्त-र्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणा-नीत्यमृताहुतिभिर्यदृचोऽधीते पयसः कुल्या अस्य पितृन्त्स्वधा उप-क्षरन्ति"(आ०गृ०सू०३अ०३खं०) इति ॥३॥

तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति ॥४॥

तत्र ऋग्वेदस्याष्टभेदा भवन्ति। शाकलबाष्कलौ २, ऐतरेय-ब्राह्मणारण्यकौ ४, शाङ्खायनमाण्डूकौ ६, कौषीतकीयब्राह्मणारण्य-

(१) 'ऋग्यजुः सामाथर्वाणश्चत्वारो वेदाः साङ्गाः स शाखाश्च-त्वारः पादा भवन्ति' (नृ०ता०उ० १—२)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काविस्यष्टभेदाः ८। अन्येऽष्टभेदा यथा—

वेदा विकृतिशाखाश्च भेदस्तु त्रिविधस्तथा।
पृथङ्नानाविधानेन व्यासेन कथितं पुरा ॥१॥ इति।

अत्राष्टभेदेनाष्टस्थानेन वा विकृतिर्ग्राह्या। विकृतिस्तु अग्रे वक्ष्यामः। तस्माद्ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्याध्ययनं कर्त्तव्यम् ॥४॥

ततश्चतुष्पदेन वक्ष्यति—

चर्चा, श्रावकः, चर्चकः, श्रवणीयपारः ॥ ५ ॥

चर्चा-अध्ययनम्। तत्र पाणिनीयसूत्रे-"चिन्ति पूजि कथि कुम्बि चर्चश्च"। एभ्योऽङ्स्त्रियां भावादौ। चिति-स्मृत्याम्। पूजि-पूजायाम्। कथि-वाक्यप्रबन्धे। कुबि-आच्छादने। चर्च-अध्ययने। चुरादय इति। अष्टाध्यायीसूत्रे ताल्वोष्ठपुटव्यापारेण शब्दस्य श्रवणं क्रियते सा चर्चा। तदध्ययनस्य श्रावको गुरुः। तस्य चर्चकः शिष्यः। श्रवणीयपारः। श्रवणीयो वेदः, तस्य पारः-समाप्तिः। इति चतुष्पदेन अध्ययनं सूचितम्। अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति। तत्पारायणं द्विविधं, प्रकृति विकृति रूपम्। का प्रकृतिः? का विकृतिः? प्रकृतिः संहिता। सा द्विविधा। रूढा, योगा। रूढा यथा-(१)"अग्निमीडे पुरोहितम्"। इति। योगा यथा—"अग्निमीडे। ईडे पुरोहितम्"(२)। इति प्रातिशाख्ये द्वितीयपटले भाष्यकारेण व्याख्यातम् ॥५॥

---

(१) शुक्लयजुर्माध्यन्दिनीयसंहितोदाहरणम्—
हरिः ॐ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्॥
आस्मिन्हव्याजुहोतन ॥ १ ॥ इति।

(२) क्रमोदाहरणम्-ॐ समिधाग्निम्। समिधेतिसम्। इधा। अग्निन्दुवस्यत। दुवस्यतघृतैः। घृतैर्बोधयत। बोधयतातिथिम्। अतिथिमित्यतिथिम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ चतुष्पारायणं यथा—

क्रमपारः, क्रमपदः, क्रमजटः, क्रमदण्डश्चेति
चतुष्पारायणम् ॥ ६ ॥

क्रमशब्द उभयसंहिता वाच्यः । स कथम् ?

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
विलोमेपदवत्सन्धिरनुलोमे यथाक्रमम् ॥ १ ॥

यथाक्रमं यथा संहिता इत्यर्थः । अन्यच्च–वर्णक्रमः, 'अक्षरसमाम्नाय एव' इत्यारण्यके । "कथमभिष्टुयादित्यक्षरशः । चतुरक्षरशः । पच्छः । अर्द्धर्चशः । ऋक्शः इति" (ऐ०ब्रा०६पञ्चि०२खं०) ब्राह्मणम् । "भूयांसि तु समाम्नानात् व्यञ्जनमात्रं तु तत्तस्याभिधानस्य भवति" (निरु०उ०६ अ०१खं०१३) इति नैरुक्ताः । क्रमः संहितावाची कथम् ? "पदप्रकृतिः संहिता" (निरु० पू०६खं०१७) इति नैरुक्तवचनात्सा क्रमरूपा इत्यर्थः । क्रमपदः । क्रमः संहिता तस्याः पदानि(१) । इति द्वे प्रकृतिपारायणे, द्वे विकृतिरूपे । विकृतिस्तु अष्टविधा भवन्ति । तच्च—

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ १ ॥ इति ।

आसां मध्ये जटादण्डयोः प्राधान्यम् । तत्कथम् ? जटानुसारिणी शिखा । दण्डानुसारिणी माला, लेखा, ध्वजो, रथश्च । घनस्तूभयानुसारित्वात् । अस्याः नियमवाक्यानि व्याडीकृतजटापटले उदाहरणानि च ।

आस्मिन् । अस्मिन्हव्या । हव्याजुहोतन । जुहोतनेतिजुहोतन ॥ १ ॥ इति ।

(१) पदोदाहरणम्—

ॐ समिधेतिसम् । इधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् ॥ आ । अस्मिन् । हव्या । जुहोतन ॥ १ ॥ इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र जटावाक्यम्—

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।

अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥१॥

अस्यार्थः—क्रमे यथोक्तेसति "क्रमो द्वाभ्याम्" इत्यादुयुक्ते क्रमप्रकारे पदजातं, पदद्वयं वा, पदत्रयं वा द्विवारमभ्यसेत् । द्विवारं पठेत् । अभ्यासप्रकारः—उत्तरमेव पूर्वम् । क्रमवत्पदद्वयं गृहीत्वा पूर्वं नाम प्रथमं उत्तरपदमभ्यसेत् । तत उत्तरपूर्वपदयोः सन्धानद्वारा पूर्वं द्विरभ्यस्योत्तरे पदेऽवसानम् । एवं प्रकारेणाध्ययनं जटाभिधीयते, कथ्यते । हीति निश्चयार्थम् । उदाहरणेन दृश्यते 'अग्निमीळऽईळेऽग्निमाग्निमीळे । ईळेपुरोहितंपुरोहितमीळऽईळेपुरोहितम्' (१)इत्यादि ज्ञेयम् ।

अथ दण्डलक्षणम्—

क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् ।

अर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते ॥ २ ॥

(२)उदाहरणं यथा—'अग्निमीळे । ईळेऽग्निम् । अग्निमीळे । ईळेपुरोहितम् । पुरोहितमीळेऽग्निम्' इत्यादि ज्ञेयम् ।

---

(१) जटोदाहरणम्—ॐ समिधाग्निमग्निꣳसमिधासमिधाग्निम् । समिधेतिसम् । इधा । अग्निन्दुवस्यतदुवस्यताग्निमग्निन्दुवस्यत । दुवस्यतघृतैर्घृतैर्दुवस्यतदुवस्यतघृतैः । घृतैर्बोधयतबोधयतघृतैर्घृतैर्बोधयत । बोधयतातिथिमतिथिम्बोधयतबोधयतातिथिम् । अतिथिमित्यतिथिम् ॥

आस्मिन्नस्मिन्नास्मिन् । अस्मिन्हव्याहव्यास्मिन्नस्मिन्हव्या । हव्याजुहोतनजुहोतनहव्याहव्याजुहोतन । जुहोतनेतिजुहोतन ॥ १ ॥ इति ।

(२) दण्डोदाहरणम्—

ॐ समिधाग्निम् । अग्निꣳसमिधा । समिधाग्निम् । समिधेतिसम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ मालालक्षणम्—

ब्रूयात्क्रमविपर्यासावर्द्धर्चस्यादितोऽन्ततः ।
अन्तं चादिं नयेदेवं क्रममालेति गीयते ॥ ३ ॥
माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा ।
आवर्त्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः(१) ॥ ४ ॥

इधा । अग्निर्न्दुवस्यत । दुवस्यताग्निᳪसमिधा । समिधाग्निम् । समिधेतिसम् । इधा । अग्निर्न्दुवस्यत । दुवस्यतघृतैः । घृतैर्दुवस्यताग्निᳪसमिधा । समिधाग्निम् । समिधेतिसम् । इधा । अग्निर्न्दुवस्यत । दुवस्यतघृतैः । घृतैर्ब्बोधयत । बोधयतघृतैर्दुवस्यताग्निᳪसमिधा । समिधाग्निम् । समिधेतिसम् । इधा । अग्निर्न्दुवस्यत । दुवस्यतघृतैः । घृतैर्ब्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयतघृतैर्दुवस्यताग्निᳪसमिधा । समिधाग्निम् । समिधेतिसम् । इधा । अग्निर्न्दुवस्यत । दुवस्यतघृतैः । घृतैर्ब्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ॥

आस्मिन् । अस्मिन्ना । आस्मिन् । अस्मिन्हव्या । हव्यास्मिन्ना । आस्मिन । अस्मिन्हव्या । हव्याजुहोतन । जुहोतनहव्यास्मिन्ना । आस्मिन् । अस्मिन्हव्या । हव्याजुहोतन । जुहोतनेतिजुहोतन ॥१॥ इति ।

(१) मालोदाहरणम्—

ॐ समिधाग्निम् । अग्निᳪसमिधा । समिधाग्निम् । समिधेतिसम् । इधा । अग्निर्न्दुवस्यत । दुवस्यताग्निम् । अग्निर्न्दुवस्यत । दुवस्यतघृतैः । घृतैर्दुवस्यत । दुवस्यतघृतैः । घृतैर्ब्बोधयत । बोधयतघृतैः । घृतैर्ब्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ॥

आस्मिन् । अस्मिन्नां । आस्मिन् । अस्मिन्हव्या । हव्या-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ शिखालक्षणम्--

पदोत्तरां जटामेव शिखामार्याः प्रचक्षते(१) ॥ ५ ॥

अथ रेखालक्षणम्—

क्रमाद् द्वि त्रि चतुष्पञ्च पदक्रममुदाहरेत् ।

पृथक्पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात्(२) ॥ ६ ॥

अथ ध्वजलक्षणम्--

ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेद्यदि ।

स्मिन् । अस्मिन्हव्या । हव्याजुंहोतन । जुहोतनहव्या । हव्याजुंहोतन । जुहोतनेतिजुहोतन ॥ १ ॥ इति ।

(१) शिखोदाहरणम्—

ओँसमिधाग्निमग्निᳬसमिधासमिधाग्निन्दुंवस्यत । समिधेतिसम् । इधा । अग्निन्दुंवस्यतदुवस्यताग्निमग्निन्दुंवस्यतघृतैः । दुवस्यतघृतैर्घृतैर्दुंवस्यतदुवस्यतघृतैर्ब्बोधयत । घृतैर्ब्बोधयतबोधयतघृतैर्घृतैर्ब्बोधयताति॑थिम् । बोधयताति॑थिमति॑थिम्बोधयतबोधयताति॑थिम । अति॑थिमित्यति॑थिम् ॥

आस्मिन्नस्मिन्नास्मिन्हव्या । अस्मिन्हव्याहव्यास्मिन्नस्मिन्हव्याजुंहोतन । हव्याजुंहोतनजुहोतनहव्याहव्याजुंहोतन । जुहोतनेतिजुहोतन ॥१॥ इति

(२) रेखोदाहरणम्—

ओँमधुनक्तम् । नक्तम्मधुं । मधुनक्तम् । नक्तमुतोषसः । उषसऽउतनक्तम् । नक्तमुत । उतोषसः । उषसोमधुंमत्पार्थिवᳬरजः । रजःपार्थिवम्मधुंमदुषसः । उषसोमधुंमत् । मधुंमत्पार्थिवम् । मधुंमदिति मधुं । मत् । पार्थिवᳬरजः । रजऽइतिरजः ॥

मधुद्यौरस्तुनःपिता । पितानोस्तुद्यौर्म्मधुं । मधुद्यौः । द्यौरस्तु । अस्तुनः । नःपिता । पितेतिपिता ॥ १ ॥ इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्गे च ऋक्त्रि धा यत्र पठनं स ध्वजः स्मृतः(१) ॥ ७ ॥

अथ रथलक्षणम्—

पादशोऽर्द्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः(२) ॥ ८ ॥

---

(१) ध्वजोदाहरणम्—

ओ३म् विष्णोः कर्म्माणि । सखेतिसखा । कर्म्माणिपश्यत । य्युज्यः सखा । पश्यतयतः । इन्द्रस्ययुज्यः । यतोव्रतानि । पस्पशइतिपस्पशे । व्रतानिपस्पशे । व्रतानिपस्पशे । पस्पशइतिपस्पशे । यतोव्रतानि । इन्द्रस्ययुज्यः । पश्यतयतः । य्युज्यः सखा । कर्म्माणिपश्यत । सखेतिसखा । विष्णोः कर्म्माणि ॥ १ ॥ इति ।

(२) रथोदाहरणम् । रथो द्विविधः । पादशः अर्द्धर्चशश्च ।

प्रथमोऽयम्—

ओ३म् समिधाग्निम् । समिधेतिसम् । इधा । अग्निःसमिधा । घृतैर्ब्बोधयत । बोधयतघृतैः । समिधाग्निम् । समिधेतिसम् । इधा । अग्निन्दुवस्यत । दुवस्यताग्निःसमिधा । घृतैर्ब्बोधयत । बोधयतातिथिम् । अतिथिम्बोधयतघृतैः । समिधाग्निम् । समिधेतिसम् । इधा । अग्निन्दुवस्यत । दुवस्यतघृतैः । घृतैर्ब्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ॥ इति ।

द्वितीयोऽयम्—ओ३म् स्वस्तिनः । नःस्वस्ति । स्वस्तिनः । नःस्वस्ति । स्वस्तिनः । नइन्द्रः । इन्द्रोनःस्वस्ति । स्वस्तिनः । नस्तार्क्ष्यः । तार्क्ष्योनःस्वस्ति । स्वस्तिनः । नइन्द्रः । इन्द्रोवृद्धश्रवाः । वृद्धश्रवाइन्द्रोनःस्वस्ति । स्वस्तिनः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिः । अरिष्टनेमिस्तार्क्ष्योनः स्वस्ति । स्वस्तिनः । नइन्द्रः । इन्द्रोवृद्धश्रवाः । वृद्धश्रवाःस्वस्ति । स्वस्तिवृद्धश्रवाइन्द्रोनःस्वस्ति । स्वस्तिनः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिः । अरिष्टनेमिः स्वस्ति० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्त्यरिष्टनेमिस्तार्क्ष्यो नꣳ स्वस्ति । स्वस्ति नः । नऽइन्द्रः । इन्द्रो वृद्धश्रवाꣳ । वृद्धश्रवाꣳस्वस्ति । वृद्धश्रवाऽइति वृद्ध । श्रवाꣳ । स्वस्ति नः । नꣳस्वस्ति वृद्धश्रवाऽइन्द्रो नꣳस्वस्ति । स्वस्ति नः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिꣳ । अरिष्टनेमिꣳस्वस्ति । अरिष्टनेमिरित्यरिष्ट । नेमिꣳ । स्वस्ति नः । नꣳस्वस्त्यरिष्टनेमिस्तार्क्ष्यो नꣳस्वस्ति । स्वस्ति नः । नऽइन्द्रः । इन्द्रो वृद्धश्रवाꣳ । वृद्धश्रवाꣳस्वस्ति । वृद्धश्रवाऽइति वृद्ध । श्रवाꣳ । स्वस्ति नः । नꣳपूषा । पूषा नः स्वस्ति वृद्धश्रवाऽइन्द्रो नꣳस्वस्ति । स्वस्ति नः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिꣳ । अरिष्टनेमिꣳस्वस्ति । अरिष्टनेमिरित्यरिष्ट । नेमिꣳ । स्वस्ति नः । नो बृहस्पतिः । बृहस्पतिर्नꣳस्वस्त्यरिष्टनेमिस्तार्क्ष्यो नꣳस्वस्ति । स्वस्ति नः । नऽइन्द्रः । इन्द्रो वृद्धश्रवाꣳ । वृद्धश्रवाꣳस्वस्ति । वृद्धश्रवाऽइति वृद्ध । श्रवाꣳ । स्वस्ति नः । नꣳपूषा । पूषा विश्ववेदाꣳ । विश्ववेदाꣳपूषा नः स्वस्ति वृद्धश्रवाऽइन्द्रो नꣳस्वस्ति । स्वस्ति नः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिꣳ । अरिष्टनेमिꣳस्वस्ति । अरिष्टनेमिरित्यरिष्ट । नेमिꣳ । स्वस्ति नः । नो बृहस्पतिः । बृहस्पतिर्दधातु । दधातु बृहस्पतिर्नꣳस्वस्त्यरिष्टनेमिस्तार्क्ष्यो नꣳस्वस्ति । स्वस्ति नः । नऽइन्द्रः । इन्द्रो वृद्धश्रवाꣳ । वृद्धश्रवाꣳस्वस्ति । वृद्धश्रवाऽइति वृद्ध । श्रवाꣳ । स्वस्ति नः । नꣳपूषा । पूषा विश्ववेदाꣳ । विश्ववेदाऽइति विश्व । वेदाꣳ ॥

स्वस्ति नः । नस्तार्क्ष्यः । तार्क्ष्योऽअरिष्टनेमिꣳ । अरिष्टनेमिꣳस्वस्ति । अरिष्टनेमिरित्यरिष्ट । नेमिꣳ । स्वस्ति नः । नो बृहस्पतिः । बृहस्पतिर्दधातु । दधात्विति दधातु ॥ १ ॥ इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ घनलक्षणम्—

जटामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत्।
अयं घन इति प्रोक्तः इत्यष्टौ विकृतीः पठेत्(१) ॥ ९ ॥

अन्यच्च घनस्य द्वितीयलक्षणम्—

अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत्।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ १० ॥

इत्यष्टविकृतिलक्षणान्युक्तानि। अध्ययने संहितापारायणम् १, पदपारायणम् २, जटापारायणम् ३, क्रमदण्डपारायणञ्च ४, एतत्पारायणचतुष्टयमित्यर्थः ॥ ६ ॥

एतेषां शाखाः पञ्च विधा भवन्ति ॥ ७ ॥

एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः ॥ ७ ॥

ताः का? इत्यत आह—

आश्वलायनी, शाङ्खायनी, शाकला, बाष्कला, माण्डूकायनाश्चेति ॥ ८ ॥

---

(१) घनोदाहरणम्—

ॐ समिधाग्निमग्निँ समिधाँसमिधाग्निन्दुवस्यतदुवस्यताग्निँ समिधाँसमिधाग्निन्दुवस्यत। समिधेतिसम्। इधा। अग्निन्दुवस्यतदुवस्यताग्निमग्निन्दुवस्यतघृतैर्घृतैर्दुवस्यताग्निमग्निन्दुवस्यतघृतैः। दुवस्यतघृतैर्घृतैर्दुवस्यतदुवस्यतघृतैर्बोधयतबोधयतघृतैर्दुवस्यतदुवस्यतघृतैर्बोधयत। घृतैर्बोधयतबोधयतघृतैर्घृतैर्बोधयतातिथिमतिथिम्बोधयतघृतैर्घृतैर्बोधयतातिथिम्। बोधयतातिथिमतिथिम्बोधयतबोधयतातिथिम्। अतिथिमित्यतिथिम् ॥

आस्मिन्नस्मिन्नास्मिन्हव्याहव्यास्मिन्नास्मिन्हव्या। अस्मिन्हव्याहव्यास्मिन्नस्मिन्हव्याजुहोतनजुहोतनहव्यास्मिन्नस्मिन्हव्याजुहोतन। हव्याजुहोतनजुहोतनहव्याहव्याजुहोतन। जुहोतनेतिजुहोतन ॥१॥ इति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति प्रसिद्धाः ॥ ८ ॥

तेषामध्ययनम् ॥ ९ ॥

तेषां आश्वलायनीयादिशाखानां समानाध्ययनं सूचयति ॥९॥

अध्यायाश्च चतुःषष्टिर्मण्डलानि दशैवतु ॥१०॥

अध्यायाश्चतुःषष्टिः । 'अग्निमीडे' 'अयं देवाय' इत्यादि चतुःषष्टिरध्याया इत्यर्थः । मण्डलानि दशैव तु । 'अग्निमीडे' 'कुसुम्भक' इत्याद्युपाकर्मप्रसिद्धानीत्यर्थः ॥ १० ॥

वर्गाणां परिसङ्ख्यातं द्वे सहस्रे षडुत्तरे ।
सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् ॥
दशसप्त पद्यन्ते सङ्ख्यातं वै पदक्रमम् ।

एकशतसहस्रं वा द्वित्रिपञ्चाशत्सहस्राद्धमेतानि चतुर्दशवासिष्ठानामितरेषां पञ्चाशीतिः क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत्सहस्राणि तु द्विखण्डानां सहस्राणां द्वात्रिंशत् षोडशोत्तरा। चत्वारिंशत्सहस्राणि द्वात्रिंशत्पञ्चाक्षरसहस्राणि ।

ऋचान्दशसहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥
एकर्चे एकवर्गश्च एकश्च नवकस्तथा ।
द्वौवर्गौ तु दृचौ ज्ञेयौ ऋक्त्रयश्च शतं स्मृतम् ॥
चतुर्ऋचां पञ्च सप्तमधिकं च शतं तथा ।
पञ्चर्चश्च द्विशद्युक्तं सहस्रं रुद्रसंयुतम् ॥
पञ्चचत्वार्यधिकं तु षड्टचां च शतत्रयम् ।
सप्तर्चस्य शतं ज्ञेयं विंशतिश्चाधिका स्मृता ॥
अष्टर्चां तु पञ्चाशत्पञ्चाधिकं तथैव च ।
दशाधिकद्विसहस्र पञ्चशाखासु निश्चिता ॥
वर्गाः संज्ञानसूक्तस्य चत्वारश्चात्र मीलिताः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं पारायणे प्रोक्ता ऋचा सङ्ख्येन न्यूनतः॥२१॥

वर्गादि आऋचान्ताः सङ्ख्या वालखिल्यैर्विना ज्ञेया । षडुत्तरसहस्रद्वयवर्गा इत्यर्थः । सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् । दशसप्तसु पठ्यन्ते सप्तदशाधिकसहस्रसूक्तानीत्यर्थः । सङ्ख्यातं वै पदक्रमं एकं शतसहस्रं वा द्विपञ्चाशत्सहस्राद्दूर्ध्वमेतानि चतुर्दशपदानि वासिष्ठानामितरेषां पञ्चाशीतिः । एकलक्षद्विपञ्चाशत्सहस्रपञ्चशतचतुर्दश१५२५१४वासिष्ठानाम् । वासिष्ठगोत्रीयाणां 'इन्द्रोतिभिः'(अष्ट० ३अ० ३वर्ग२३) एकसप्ततिपदात्मको वर्गो नास्ति । इतरगोत्रीयाणां पञ्चाशीत्यधिक ८५ पदानीत्यर्थः । अथ वालखिल्यसहिता पदसङ्ख्योच्यते—

लक्षैकं तु त्रिपञ्चाशत्सहस्रं शतसप्तकम् ।
पदानि च द्विनवतिः प्रमाणं शाकलस्य च ॥ १ ॥

एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतद्विनवति१५३७९२अधिकानि पदानीत्यर्थः ।

पदानि वालखिल्यस्य ह्यर्कसङ्ख्याशतानि च ।
अधिकानि तु सप्तैव वर्गा अष्टादश स्मृताः ॥ १ ॥

सप्ताधिकद्वादशशतानि१२०७पदानीत्यर्थः । इत्याश्वलायनानाम् । शाङ्खायनानां तु वालखिल्यसहितपदसङ्ख्योच्यते—

शाकल्यदृष्टे पदलक्षमेकं सार्द्धन्तु वेदे त्रिसहस्रयुक्तम् ।
शतानि सप्तैव तथाऽधिकानि चत्वारि त्रिंशच्च पदानि चर्चा ॥१॥

शाकल्यो माण्डूकगणस्थः । संहिता पदानि—एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि १५३७३४ पदानीत्यर्थः ।

पदानि वालखिल्यस्य रुद्रसङ्ख्याशतानि च ।
षट्पञ्चाशदधिकानि वर्गाः सप्तदशास्तथा ॥ १ ॥

एकादशशतषट्पञ्चाशदधिकवालखिल्ये ११५६ पदानीत्यर्थः । अष्टपञ्चाशत्पादात्मकऋक्त्रयस्य 'यमृत्विजो' (अष्ट० ६ अ० ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ग २९) वर्गो नास्ति । न तु हविष्पान्तीयसूक्ते 'द्वे समीची' (अष्ट० ८ अ० ४ वर्ग १३) वर्गे त्रिऋचानन्तरमेक एवाग्निर्ऋक् । 'यमृत्विजो' ऋक् खिलरूपेण पठन्ति । 'ज्योतिष्मन्तम्' (अष्ट० ६ अ० ४ वर्ग २९) ऋचाभावः । ऋक्त्रयस्य तेषामन्ते पदाभावत्वात् । अन्ते वर्गसमाप्तौ यावन्मात्रमृचं पठन्ति । एवं 'द्वे समीची' इति षड्ऋचो वर्गः । आश्वलायनानां चतुर्ऋचात्मको वर्गः । इत्याश्वलायनशाङ्खायनशाखयोर्भेदरध्ययन इत्यर्थः । यस्य मन्त्रस्य पदाभावस्तस्य खैलिकत्वं सिद्धम् । तर्हि 'त्र्यम्बकं यजामहे' (अष्ट० ५ अ० ४ वर्ग ३०) इति मन्त्रस्य पदाभावात्तस्य खैलिकत्वं सिद्धम् । न हि उमागानात् उपलेखायाम् । 'त्र्यम्बकं (अष्ट० ५ अ० ४ वर्ग ३०), प्रथमम् 'भद्रंनः' (अष्ट० ७ अ० ७वर्ग २), 'प्रजापते' (अष्ट० ८ अ ७ वर्ग ४), 'ऋतंच' (अष्ट० ८ अ० ८ वर्ग ४०) इति पदक्रममिममुमयाभिगीध्वम् । अर्द्धर्चान्तेपदगीतम् । तस्मात्पदकाले क्रमकाले च पठन्ति । "क्रमो द्वे पदश" इति वचनात् । अत्र द्वितीयपदं नास्ति अर्द्धर्चान्तसमापनात् । क्रमाभावः । तस्मात्पदकाले, क्रमकाले पठनं सएव पदक्रम इत्यर्थः । क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत्सहस्राणि—

षत्वे, णत्वे च दीर्घत्वे आकारे सानुनासिके ।
त्रिचतुष्पञ्चक्रमे अर्द्धर्चान्ते च वेष्टयेत् ॥ १ ॥

क्रमेणोदाहरणानि ज्ञातव्यानि—'सुषुमायातम्' (अष्ट० २ अ० २ वर्ग १), 'मो षुणः' (अष्ट० १ अ० ३ वर्ग १६), 'वाजेषु सासहिर्भव' (अष्ट० ३ अ० २ वर्ग २२), 'आँ उपानसः' (अष्ट० ८ अ० ५ वर्ग २६), 'न्याविध्यदिलीविशस्य' (अष्ट० १ अ० २ वर्ग ३), 'अगादारैगुरुक्ष्णा' (अष्ट० १ अ० ८ वर्ग १), 'निरुस्वसारमस्कृतोषसम्' (अष्ट० ८ अ० ७ वर्ग १४), 'अग्निमीडे' 'ऋत्विजमित्यृत्विजम्' इति । चतुस्त्रिंशत्सहस्राणि ३४००० क्रमकाले

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेष्टनानीत्यर्थः ।

द्विखण्डानां सहस्राणां द्वात्रिंशत्षोडशोत्तरा ।

षोडशोत्तरद्वात्रिंशत्सहस्राणि ३२०१६ द्विखण्डानीत्यर्थः । चत्वारिंशत्सहस्राणि द्वात्रिंशतं चाक्षरसहस्राणि । चतुर्लक्षद्वात्रिंशत्सहस्राक्षराणि ४३२००० इत्यर्थः । द्वात्रिंशतं चाक्षरसहस्राणीत्यर्थसमाप्तेः पुनर्वचनमुक्तम् ।

अथ पारायणे ऋक्परिमाणा उच्यन्ते—

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥ १ ॥

एतत्पारायणं वालखिल्यैर्विना सङ्ख्यातम् । वालखिल्यानि पारायणे न सन्ति । तदुच्यते—ऋग्वेदान्तर्गतं वालखिल्यमेकादश ११ सूक्तम् । सूक्तसहस्र १००० सप्तदशाधिक १७ मित्यत्र ऋचां दशसहस्राणीत्येतत्सङ्ख्याव्यतिरिक्तानि वालखिल्यानीति प्रसिद्धिः । तत्र यज्ञानुष्ठाने ब्राह्मणे सूत्रे च श्रूयते—"वालखिल्याः शंसन्ति प्राणा वै वालखिल्या" (ऐ०ब्रा०६पञ्चि० २८खं०)इति । "अभि प्र वः सुराधसम् (अष्ट०६ अ०४ वर्ग १४) इति षड् वालखिल्यानां सूक्तानि" (ऐ०आर०५ खं० १०) इति ब्राह्मणे आरण्यके । 'अथ वालखिल्या विहरेत् तदुक्तं षोडशिना' इति सूत्रकारः । श्रौतस्मार्त्तसर्वकर्मानुष्ठाने वालखिल्यप्रसिद्धिः । वेदपारायणे वर्जमित्यर्थः । शौनकाचार्यवचनात् । यथा—मैषाध्याय, कुन्तपाध्याय, निविदाध्याय, सुपर्णाध्यायश्चेति । तद्वद्वालखिल्याध्याय इत्यर्थः । वालखिल्यसहितासर्वानुक्रमणीयमन्त्ररूपीऋक्सङ्ख्योच्यते—द्विपञ्चाशदधिकपञ्चशतदशसहस्राणीति १०,५५२ । वालखिल्यव्यतिरिक्तसङ्ख्या तु—द्विसप्तत्यधिकचतुःशतदशसहस्रऋक् १०४७२ । एतत्सङ्ख्या नित्या द्विपदा नैमित्तिकद्विपदा सहिता उक्ता । हवनाध्ययनाख्यां समाख्या सा नित्या द्विपदा । आसां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्ख्या उपलेखायाम् । तच्च–'साधुः' (अष्ट०१ अ०५ वर्ग १४), 'असिक्न्यां' (अष्ट०३ अ०५ वर्ग २३), 'सिषक्तु न' (अष्ट०४ अ०२ वर्ग १६), 'उरौ देवा' (अष्ट०४ अ०२ वर्ग ११), 'उरौदेवा' (अष्ट०४ अ०२ वर्ग २२), 'विद्वेषांसी' (अष्ट०४ अ०५ वर्ग १२), 'अया वाजं' (अष्ट०४ अ०६ वर्ग ३), 'महिराधः' (अष्ट०४ अ०७ वर्ग३४), 'आवां सुम्ने' (अष्ट०५ अ०१ वर्ग४), 'ते ते देवाय' (अष्ट०५ अ०२ वर्ग२३), 'रायस्कामः' (अष्ट०५ अ०३ वर्ग१७), 'मति न स्तोमं' (अष्ट०५ अ० ३ वर्ग२७), 'स्वायुधासः' (अष्ट०५ अ०४ वर्ग२४), 'पितुर्न पुत्रः' (अष्ट०६ अ०१ वर्ग३४), 'स नो वाजेषु' (अष्ट०६ अ०४ वर्ग३), 'गावो न यूथं' (अष्ट०६ अ०५ वर्ग६), 'पवस्व सोममन्दयन्'(अष्ट०७ अ०२ वर्ग १६) इति तिस्रः, 'परिसुवानो' (अष्ट०६ अ०८ वर्ग८), 'नृभिर्येमा नः' (अष्ट०७ अ०५ वर्ग १५), 'प्रत्यश्वमर्कमनयञ्छचीभिः' (अष्ट०८ अ०८ वर्ग १५) इति द्विपदैकपदा द्वाविंशतिः । तासां सप्तदश १७ द्विपदा एकपदाः पञ्च ५ इति । हवनाध्ययने विपरीता, सा नैमित्तिकाद्विपदा । ता आह वर्गरूपेण—'पश्वानतायुं' (अष्ट०१ अ०५ वर्ग९) दश, 'रयिर्न' (अष्ट०१ अ०५ वर्ग१०) दश, 'वनेषु' (अष्ट०१ अ०५ वर्ग११) दश, 'श्रीणं' (अष्ट०१ अ०५ वर्ग१२) दश, 'शुक्रः शुशुक्काँ' (अष्ट०१ अ०५ वर्ग१३) दश, 'वनेम पूर्वीः' (अष्ट०१ अ०५ वर्ग१४) दश, 'अग्ने त्वन्नः'(अष्ट०४ अ०१ वर्ग१६) चत्वारि, 'अग्ने भव' (अष्ट०५ अ०२ वर्ग २३) षट्, 'प्रशुक्रैतु' (अष्ट०५ अ०३ वर्ग २५) दश, 'राजा राष्ट्राणां' (अष्ट०५ अ०३ वर्ग२६) दश, 'क ईं व्यक्ता' (अष्ट०५ अ०४ वर्ग२३) दश, 'बभ्रुरेको' (अष्ट०६ अ०२ वर्ग३६) दश, 'परिप्रधन्व' (अष्ट०७ अ०५ वर्ग२०) दश, 'तन्ते सोतारो'(अष्ट०७ अ०५ वर्ग२१) द्वादश, 'इमा नुकं' (अष्ट०८ अ०८ वर्ग१५)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारि, 'आयाहि मनसा' (अष्ट०८ अ०८ वर्ग ३०) चत्वारीति नैमित्तिकद्विपदा चत्वारिंशोत्तरशतम् १४० इति।

हवने एकैका। अध्ययने द्वे द्वे। आसामन्त्या एका उर्वरिता सा नित्या द्विपदा। उक्तं च परिभाषायाम्—'विंशिका द्विपदा विराजस्तदर्द्धमेकपदा द्विर्द्विपदास्तृचः समामनन्ति। आयुक्षवन्त्या द्विपदैव' (परिभा० १२खं) इति। द्विर्द्विपदास्तृचः समामनन्ति। यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति तास्तृचः अध्ययने चतुष्पदाः कृत्वेत्यर्थः। आयुक्षवान्त्या द्विपदैव। सूक्तस्यर्चां युजो या न भवति तास्त्वन्त्या नित्या द्विपदैव। एवमध्ययने द्वावर्द्धर्चे ऋगेव प्राधान्यम्। त्रीण्यर्द्धर्चायाः कथम्? तत्रापि द्वावर्द्धर्चावेका ऋचा। अर्द्धर्चा एका कर्तव्या। अध्ययनसम्प्रदायबलात्। 'अनादेशेऽष्टाक्षराः पादाश्चतुष्पदाश्चर्चं' (परिभा० ३खं०) इति परिभाषायाम्। अध्ययने त्रीण्यर्द्धर्चन्नृगेव सम्प्रदायो नास्ति। आसां परिमाणमाह—'अग्निं होतारम्' (अष्ट०२ अ०१ वर्ग१२) पञ्च, 'सहिशर्द्धोन' (अष्ट०२ अ०१ वर्ग१३) षड्, 'अयं जायत'(अष्ट०२ अ०१ वर्ग१४) पञ्च, 'विश्वो विहायाः' (अष्ट०२ अ०१ वर्ग१५) तिस्रः, 'यं त्वं रथम्' (अष्ट०२ अ०१ वर्ग१६) पञ्च, 'प्रतद्वोचे यं' (अष्ट०२ अ०१ वर्ग१७) षट्, 'एन्द्रयाह्युप नः' (अष्ट०२ अ०१ वर्ग१८) पञ्च, 'इमां ते वाचं' (अष्ट०२ अ०१ वर्ग१९) चत्वारि, 'स नो नव्येभि' (अष्ट०२ अ०१ वर्ग१९) वर्जम्। 'इन्द्राय हि द्यौः' (अष्ट०२ अ०१ वर्ग२०) सप्त, 'त्वया वयं' (अष्ट०२ अ०१ वर्ग२१) षड्, 'अवर्म ह' (अष्ट०२ अ०१ वर्ग२२) एका, 'वनोति हि' (अष्ट०२ अ०१ वर्ग२२) एका, 'आत्वा जुवो' (अष्ट०२ अ०१ वर्ग२३) षट्, 'स्तीर्णम्' (अष्ट०२ अ०१ वर्ग२४) पञ्च, 'इमे वां सोमा' (अष्ट०२ अ०१ वर्ग२५) एका, 'इमे ये ते सुवायो वां' (अष्ट०२ अ०१ वर्ग२५) एका, 'प्रमुज्येष्ठम्' (अष्ट०२ अ०१

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ग२६) षट्, 'ऊती देवानाम्' (अष्ट०२ अ०१ वर्ग२६) वर्जम् । 'सुषुमायातम्' (अष्ट०२ अ०२ वर्ग१) त्रीणि, 'प्रप्रपूष्णः' (अष्ट०२ अ०२ वर्ग२) चतुष्कम् , 'अस्तु श्रौषट्' (अष्ट०२ अ०२ वर्ग३) चत्वारि, 'शचीभिर्नः' (अष्ट०२ अ०२ वर्ग३) वर्जम् । 'वृषन्निन्द्र' (अष्ट०२ अ०२ वर्ग४) पञ्च, 'ये देवासो' (अष्ट०२ अ०२ वर्ग४) वर्जम् । 'तवत्यन्नर्यम्' (अष्ट०२ अ०६ वर्ग२८) एका, 'सखे सखायम्' (अष्ट०३ अ०४ वर्ग१२) एका, 'अयारुचा' (अष्ट०७ अ०५वर्ग२३) त्रीणि, एतास्त्रीणि त्रीण्यर्द्धर्चा ऋचा हवनीयाश्चतुर्न्नवतिसङ्ख्या । इति त्रीण्यर्द्धर्चे ऋग्यवने । अध्ययने अर्द्धर्चेद्वयेन ऋगेका । अर्द्धर्चेनैकैव ऋग्द्वये कर्त्तव्य इत्यर्थः । एकर्चस्य ऋग्द्वयं विराट्छन्दो विना कथं भवति ? इत्याशङ्क्य तत्रोच्यते—विराट्छन्दः सर्वच्छन्दसि व्याप्तं वर्त्तते । उक्तं चारण्यके—"चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छन्दः पुरुषो वेदपुरुषो महापुरुष इति" (शा० आर० अ०८ खं०३) । "तस्योष्णिग्लोमानि त्वग्गायत्री त्रिष्टुप्मांसमनुष्टुप् स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती" (ऐ० आर० २ खण्ड ६) इति । "यान्येतानि विराट्चतुर्थान्येवमु हैवैवं विदुष एतदहः सर्वैश्छन्दोभिः प्रतिपन्नं भवति" (ऐ० आर० १ खण्ड १२) इति प्राप्तो भवतीत्यर्थः । "गायत्रीश्च पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः पशव" इति ब्राह्मणम् । अत्रोदाहरणम्—"पवस्व सोम मन्दयन् (अष्ट०७ अ०२ वर्ग १६) तिस्रो नित्यद्विपदा गायत्र्यः" इति सर्वानुक्रमण्याम् । "द्विपाद्वै पुरुषो वीर्यं त्रिष्टुब्विराड्भ्यामनयोर्द्वाविंश्योर्द्विपदयोरयं पुरुषः" । अत्रोदाहरणानि—"आवां सुम्ने वरिमन्" (अष्ट०५ अ०१ वर्ग४), "प्रत्यञ्चमर्कमनयन्" (अष्ट०८ अ०८ वर्ग१५), "परिसुवानो गिरिष्ठाः" (अष्ट०६ अ०८ वर्ग८) जगती पाद इति । एवं सर्व-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्तो भवतीत्यर्थः । "छन्दाꣳसि जज्ञिरे" इति श्रुतिः । तथा च शतपथब्राह्मणे—"किञ्छन्दः कादेवता प्रतिष्ठेऽइति द्विपदा छन्दो, विष्णुर्देवता प्रतिष्ठे" इति । यथा विष्णुः सर्वव्याप्तस्तथा विराट्छन्द इत्यर्थः । विराट् छन्दस्तु चतुष्पदा । त्रीण्यर्द्धर्चायां पञ्चपदा ऋक्कर्त्तव्येति । किं प्रमाणम् ? तत्रोच्यते—

एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन्पङ्क्तीरुपतिष्ठमानः ॥
(अष्ट०८ अ०६ वर्ग २३) ।

एकपदा द्विपदा नित्या द्विपात्त्रिपादमभ्येति । एकीभूता भवन्तीत्यर्थः । अस्योदाहरणम् "अग्निं होतारं मन्ये० दसम् । यऽऊर्द्ध्वया० कृपा" (अष्ट०२ अ०१ वर्ग१२)। अग्रे अर्द्धर्चा—"घृतस्य विभ्राष्टिमनुवष्टि० सर्पिषः" (अष्ट०२ अ०१ वर्ग१२) इति द्विपदा । चतुष्पदातु—"पश्वानतायुम्०" (अष्ट०१ अ०५ वर्ग९) । एकार्द्धर्चा त्रिपदा, एकार्द्धर्चा द्विपदा, एका ऋक् पञ्चपदा अध्ययने । 'द्विर्द्विपदास्तृचः समामनन्ति' इत्यत्र समपादग्रहणात् । असमानपादा विरुद्धा, तर्हि पङ्क्तिश्छन्दो पञ्चपदा भवति। तस्य द्वितीयभेदो विराट्, तस्मात्पञ्चपादत्वं प्राप्तम् । समपादा वा असमपादो विराट्छन्द इत्यर्थः । अत्र श्रुतिः—

"समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्नासमं दुहाते" (अष्ट०८ अ०६ वर्ग२३) इत्यनया ऋचा परिहारः । दक्षिणवामहस्तौ समौ कर्तृत्वे असमावित्यर्थः । अथाध्ययने ऋक्सङ्ख्योच्यते-षण्णवत्यधिकचतुःशतदशसहस्राणीति १०४९६ । ताः सहितनैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति । १०५-६६ । 'सञ्ज्ञानमुशनावदत्' सूक्तस्य पञ्चदशचैकीकृत्य १०५८० एवं पारायणे ऋक्सङ्ख्या । 'ऋचां दशसहस्राणि' इति वचनस्य सङ्ख्या पूर्णा भवतीत्यर्थः । एका उर्वरिता सा "भद्रंनो अपि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वातयमनः" (अष्ट०७ अ०७ वर्ग२) इति पादाधिक्यमनुक्रमणिकावृत्तावप्युक्तेः। 'भद्रं पुच्छम् (ऐ० आर० ५ खं० ८) इत्यारण्यके।

अथ सञ्ज्ञानसूक्तम्—

सञ्ज्ञानमुशनाऽवदत्सञ्ज्ञानं वरुणोऽवदत्।
सञ्ज्ञानमिन्द्रश्चाग्निश्च सञ्ज्ञानं सविता वदत् ॥ १ ॥
सञ्ज्ञानं नश्वेभ्यः सञ्ज्ञानमरणेभ्यः।
सञ्ज्ञानमश्विना युवमिहास्मासु नियच्छताम् ॥ २ ॥
यत्कक्षीवांसं वननं पुत्रोऽअङ्गिरसाभवेत्।
तेन नोऽद्य विश्वदेवाः सम्प्रियां समजीजनन् ॥ ३ ॥
संवो मनांसि जानतां समाकूतिर्मनामसि।
असौ यो विमना मनः संसमावर्त्तयामसि ॥ ४ ॥
नैर्हस्त्यं सेनादरणं परिवर्त्मे तु यद्धविः।
तेनाऽमित्राणां बाहून्हविषा शोषयामसि ॥ ५ ॥
परिवर्त्मान्येषामिन्द्रः पूषा च सस्रतुः।
तेषां वोऽअग्निदग्धानामग्निमूढानामिन्द्रो हन्तु वरं वरम् ॥६॥
ऐषु नह्यवृषाजिनं हरिणस्य धियं यथा।
पराँऽअमित्राँऽऐष त्ववाची गौरुपाजतु ॥ ७ ॥
प्राध्वराणां पते वसो होतर्वरेण्य क्रतो।
तुभ्यं गायत्रमृच्यते ॥ ८ ॥
गोकामोऽअन्नकामः प्रजाकामऽउत कश्यपः ॥ ९ ॥
भूतं भविष्यत्प्रस्तौति सहब्रह्मैकमक्षरं बहु ब्रह्मैकमक्षरम् ॥१०॥
यदक्षरं भूतं कृतं विश्वेदेवाऽउपासते।
महऽऋषिमस्यगोप्तारं जमदग्निरकुर्वतम् ॥ ११ ॥
जमदग्निराप्यायते छन्दोभिश्चतुरुत्तरैः।
राजा सोमस्य भक्षेण ब्रह्मणा वीर्यावताम् ॥ १२ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः ।
अजो यत्तेजो ददृशे शुक्रं ज्योतिः परो गुहा ॥ १३ ॥
यदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरम् ध्रुवं ब्रह्मचराचरम् ।
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषम् ॥१४॥
यद्देवानां त्र्यायुषं तन्मेऽअस्तु त्र्यायुषं सर्वमस्तुशतायुषं बलायुषम् ॥ १५ ॥
(तच्छंयोरावृणी महे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे ॥१॥)
(अष्ट०८ अ०८ परिशिष्ट)

इति सञ्ज्ञानसूक्तं पञ्चदशर्चात्मकम् । अस्य ग्रहणे प्रमाणमाश्वलायनसूत्रम् । तच्च—"समानीव" इत्येका, "तच्छंयोरावृणीमहे" इत्येकेति । तथा च शाङ्खायनस्य कौषीतकिसूत्रम्—"अथोपाकरणमोषधीनां प्रादुर्भावे हस्तेन श्रवणेन वाऽक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः सूक्तानुवाकाद्याभिरिति वाऽध्यायार्षेयाद्याभिरिति माण्डूकेयोऽथ ह स्माह कौषीतकिरग्निमीडे पुरोहितमित्येका कुसुम्भकस्तदब्रवीदावदँस्त्वं शकुने भद्रमावद गृणाना जमदग्निना धामन्ते विश्वं भुवनमधिश्रितं गन्ता नो यज्ञं यज्ञियाः सुशमि यो न स्वोऽअरणः प्रतिचक्ष्वविचक्ष्वाग्ने याहि मरुत्सखा यत्ते राजं घृतं हविरितिद्वयृचा तच्छँयोरावृणीमहइत्येका हुतशेषाद्धविः प्राश्नन्ति"(कौ०गृ०सू० ४ अ० ५खं०) इति । पञ्चशाखानां पारायणे 'तच्छँयोरावृणीमहे' इत्यत्र समाप्तिरेकवेदत्वात् । उक्तञ्च—

ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः ।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

साङ्ख्याश्वलायनौ चैव माण्डूका बाष्कलास्तथा ।
बह्वृचा ऋषयः सर्वे पञ्चैते ह्येकवेदिनः ॥ इति ।

साङ्ख्यानाम शाङ्खायन इति ।

अथ पारायणे वर्गसङ्ख्योच्यते—'एकर्चं एकवर्गश्च एकर्चं नवकस्तथा' । एकर्चं एकवर्गो 'जातवेदसे' (अष्ट०१ अ०७ वर्ग७) इत्यर्थः । नवर्चं एकवर्गः 'आपो हि ष्ठा (अष्ट०७ अ०६ वर्ग५) इति । द्वौवर्गौ तु द्वृचौ ज्ञेयौ, द्वौ वर्गौ द्व्यृचावित्यर्थः । 'अग्ने त्वन्नोऽअन्तमः' (अष्ट०४ अ०१ वर्ग१६), 'आयाहि वनसा सह' (अष्ट०८ अ०८ वर्ग३०) इति । ऋक्त्र्यस्य शतं स्मृतम् । तृचो वर्गाः शतमित्यर्थः १०० । 'उतत्यं चमसं नवम्' (अष्ट०१ अ०२ वर्ग२) इत्यादि ।

चतुर्ऋचां पञ्चसप्तत्यधिकं च शतं तथा ।

चतुर्ऋचवर्गाः पञ्चसप्तत्यधिकशत१७५मित्यर्थः । 'यदङ्ग दाशुषे त्वम्' (अष्ट०१ अ०१ वर्ग२) इत्यादि ।

पञ्चर्चं तु द्विशतकं सहस्रं रुद्रसंयुतम् ।

पञ्चर्चवर्गा एकादशाधिकद्वादशशतानीत्यर्थः १२११ । 'अग्निमीडे' इत्यादि,

पञ्चचत्वार्यधिकं तु षड्ऋचां तु शतत्रयम् ।

षड्ऋचवर्गाः पञ्चचत्वारिंशदधिकशतत्रय ३४५ इत्यर्थः । 'अश्विना यज्वरीरिष' (अष्ट०१अ०१वर्ग५) इत्यादि,

सप्त ऋचां शतं ज्ञेयं विंशतिश्चाधिकाः स्मृताः ।

सप्तर्चवर्गा विंशत्यधिकशत१२० इत्यर्थः ॥

'यच्चिद्धि सत्यसोमपा' (अष्ट०१अ०२वर्ग२७) इत्यादि,

अष्टऋचां तु पञ्चाशत्पञ्चाधिकास्तथैव च ।

अष्टर्चवर्गाः पञ्चाधिकपञ्चशत ५०५ इत्यर्थः । 'इन्द्रं विश्वाऽअवीवृधन्' (अष्ट०१ अ०१ वर्ग२१) इत्यादि । एवं दशा-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धिकसहस्रद्वयवर्गा २०१० इत्यर्थः । पञ्चशाखासु निश्चिताः । पञ्चशाखानां पारायणे निश्चयेन इत्यर्थः ।

वर्गाः सञ्ज्ञानसूक्तस्य चत्वारश्चात्र मीलिताः ।

सञ्ज्ञानसूक्तस्य चत्वारोवर्गाश्चात्र मिलित्वा दशाधिकसहस्रद्वयमित्यर्थः ।

एवं पारायणे प्रोक्ता ऋचां सङ्ख्येन न्यूनतः ।

एवं पूर्वोक्तप्रकारेण वर्गस्य ऋक्न्यूनसङ्ख्येन दशर्चस्य पञ्चऋक् त्रीण्यर्द्धर्चस्य ऋक्कर्तव्येत्यर्थः । एवं चतुर्विधपारायणेऽपि ज्ञेयम् । 'समानीव' (अष्ट०८ अ०८ वर्ग४९) इति शाकलानां, 'तच्छँय्योरिति' बाष्कलानामित्यत्र बाष्कलशाखाध्ययनमनुक्रमणिकावृत्तावुक्तम् । तच—

गौतमादौशिजः कुत्सः पारुच्छेपाद्दषेः परः ।
कुत्सादीर्घतमेत्येवं बाष्कलाध्ययने क्रमः ॥

अस्यार्थः—गौतमादौशिजः कुत्सः । 'उपप्रयन्तो' (अष्ट०१अ० ५वर्ग२१), 'नासत्याभ्याम्' (अष्ट०१ अ०८ वर्ग८), 'अग्निं होतारम्' (अष्ट०२ अ०१ वर्ग१२), 'इमं स्तोमम्' (अष्ट०२ अ०७ वर्ग६); 'वेदिषदे' (अष्ट०२ अ०२ वर्ग५) एष बाष्कलक्रम इत्यर्थः । अत्रैवमुक्ते उत्तममण्डले नवके अनुक्रमाविपर्यासः । तच—'स्वादोरभक्षि' (अष्ट०६अ० ४ वर्ग११) सूक्तान्ते 'अभिप्रवः सुराधसम्' (अष्ट०६ अ०४ वर्ग १४), 'प्र सुश्रुतम्' (अष्ट०६ अ०४ वर्ग १६) इति सूक्तद्वयं पठित्वा, 'अग्नऽआयाह्यग्निभिः' (अष्ट०६ अ०४ वर्ग३२) इति पठेत् । ततः 'आप्र द्रव' (अष्ट०६ अ०६ वर्ग१) अध्याये 'गौर्धयति' (अष्ट०६ अ०६ वर्ग २८) अनुवाको दशसूक्तात्मकः शाकलस्य । पञ्चदशसूक्तात्मको बाष्कलस्य । तत्रोच्यते—'गौर्धयति' सूक्तानन्तरं 'यथा मनौ सांवरणौ' (अष्ट०६ अ०४ वर्ग१८), 'यथा मनौ विवस्वति' (अष्ट०६ अ०४ वर्ग२०), 'उपमन्त्वा' (अष्ट०६ अ०४ वर्ग२२), 'एतत्तऽइन्द्र' (अष्ट०६ अ०४ वर्ग २४), "भूरिदिन्द्रस्य'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अष्ट०६ अ०४ वर्ग२६) इत्यन्तानि पञ्चसूक्तानि पठित्वा, 'आत्वा· गिरो रथीरिव' (अष्ट०६ अ०६ वर्ग३०) इति पठेयुः। अन्ते-'सं· समिद्' (अष्ट०८ अ०८ वर्ग४२) सूक्तानन्तरं पञ्चदशऋचात्मकं 'सञ्ज्ञानमुशनावदत्' इत्यादि 'तछँय्योरावृणीमहे' इत्यन्तं वेदस· माप्तिरिति बाष्कलशाखाध्ययनम्। एवमध्ययनाभावाच्छाखाऽभाव इत्यर्थः। सूक्तसहस्रसप्तदशाधिकात् अष्टौ सूक्तानि बाष्कलस्या· धिकानीत्यर्थः। 'प्रति ते' (अष्ट०६अ०४ वर्ग२७), 'युवं देवा' (अष्ट०६अ०४ वर्ग२८), 'यमृत्विजो' (अष्ट०६अ०४ वर्ग२९), 'इमानिवाम्' (अष्ट०६अ०४ वर्ग३०) इति चत्वारि बालखिल्य· सूक्तानां लोप इत्यर्थः।

यस्तानृग्वेदचैवाप्यधीते स नाकपृष्ठं भजते ह शश्वत्।

अस्यार्थः यः तान् ऋगर्थवित् वेद विदितः हवने पारायणे च अधीते सः वेदिताऽध्येता च नाकपृष्ठं शश्वत्सदा भजते। ह प्रसिद्धौ। इतोऽमुं लोकमेत्युत तस्मान्न प्रच्यवते हीत्यर्थः।

अथ पारायणफलं तदुक्तमारण्यके-"यद्धि सन्धिं विवर्त्तयति तं निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्य रूपमग्रऽउऽएवोभयमन्तरेणोभयव्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणेति"।

अस्यार्थः-द्वयोः पदयोरक्षरयोर्वाऽपि सन्धिस्तस्य अविच्छे· दाध्ययनं तन्निर्भुजं संहितापारायणमुच्यते। शुद्धे द्वे पदे अक्षरे वा सन्धिमकुर्वतोच्चारणं तत्प्रतृण्णं तत्पदपारायणम्। संहितापदाभ्या· मुभाभ्यां व्याप्तमुभयमन्तरेण क्रमपारायणमित्यर्थः। तथा च सति, त्रिभिः कृत्वा स्वरास्वरं विजानाति मात्रामात्रां विभजन्ते सा संहि· तेति। एवमेतां संहितां यो वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति। तस्मात्क्रमादृते द्वे पदे संहिता द्वे पदस्वरश्च न सिध्यति। द्वे पदसिद्धे उत्तरारम्भः कर्त्तुं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न शक्यते । अतश्च पादार्द्धर्चऋक्, सूक्तसिध्यर्थं भगवता पाञ्चालेन स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं भवतीति च । अत्र श्लोकः—भागाथेन पुरा दानं दृष्ट्वा क्रुद्धो महामुनिः ।

अर्थवन्तं क्रमं ब्रूयाद्देवतायाश्च शास्त्रतः ॥

अतो ऋग्यजुषां बृंहणं पदैः स्वरैश्चाध्ययनं तथा त्रिभिः ।

अतोऽपि अस्मादपि हेतोः क्रमः अर्थवान्भवति । क्रमेण कृत्वा ऋग्वेदपारायणे ऋचां बृंहणं साधारणं भवति । इदमित्थमेव पाठ इति स्वरमात्रादिरूपेण निश्चयो भवति । तथा यजुर्वेदपारायणे यजुषां बृंहणं नाम साधारणं स्वरमात्रादिरूपेण इदमित्थमेव पाठ इति निश्चयो भवति, इत्यतिदेशः । इत्यलं प्रपञ्चेन ।

अथ पारायणविधिः । अत्रादौ कलशस्थापनाद्युक्तं महार्णवे—

तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ।
कलशं सुदृढं तत्र सुनिर्णिक्तं सुभूषितम् ॥ १ ॥
पुष्पपल्लवमालाभिश्चन्दनैः कुङ्कुमादिभिः ।
मृत्तिकायवसम्मिश्रं वेदमध्ये न्यसेत्ततः ॥ २ ॥
पञ्चाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः ।
स्नापितः स्थापितः कुम्भे चतुर्बाहुश्चतुर्मुखः ॥ ३ ॥
वत्सजान्वाकृतिं वेदमुत्तराग्रैः कुशैः कृतम् ।
ब्रह्मोपधाने दत्वा तं ततः स्वस्त्ययनं पठेत् ॥ ४ ॥
प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते ।
यज्ञोपवीतं नैवेद्यं वस्त्रचन्दनकुङ्कुमैः ॥ ५ ॥
स्रग्धूपदीपताम्बूलै(१)रेतैश्चापि पितामहम् ।
ब्रह्मयज्ञानमिति वा गायत्र्या वा प्रपूजयेत् ॥ ६ ॥
उपाध्यायं च सम्पूज्य यथापाठं पठेत्ततः ॥

ततो होमादि वक्ष्यमाणं कृत्वा पठेदित्यर्थः । तत्रैव बौधायनः—

'स्थण्डिलं कल्पयित्वाग्निमुपसमाधाय तं परिस्तीर्याज्येनै-

(१) 'रक्षतैश्च पितामहम्' इ० पा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताभ्यो देवताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्योदेवेभ्यो ब्रह्मणे ऋषिभ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषयेऽ-ग्नये काण्डऽऋषये विश्वेभ्योदेवेभ्यः काण्डऽऋषिभ्यः संहिताभ्यो देवताभ्यऽउपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणी-देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्योदेवेभ्यो वरुणेभ्यो-ऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च हुत्वा पुनः परिषिञ्चति समाप्ते चैता यजुषा तर्पयति'।

अन्ते एता'अग्निसोमाद्या' यजुषा पदेन सह तर्पयेत्। यद्वा-"भूर्देवांस्तर्पयामि" इत्यादि यजुषा तर्पयित्वाऽन्यादींस्तर्पयेदित्यर्थः।

महार्णवे—

(१)'एवमृग्वेदस्य काण्डऽऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवायाऽत्रये भरद्वाजाय जमदग्नये गौतमाय वसिष्ठाय प्रागाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महानाम्नीभ्य इति'। 'ततो वेदादिमारभ्य सन्ततम-धीयीत'इत्याह भगवान्बोधायनः।

पुनर्महार्णवे—

'अथातः पारायणविधिं व्याख्यास्याम आसमाप्तेर्नाश्नीयाद्यथा-शक्ति वाऽपः पयः फलान्योदनं वा हविष्यमात्रमन्नमल्पं भुक्त्वा तदा ऽशेषमधीयीत, ग्रामात्प्राच्यामुदीच्यां वा दिश्युपनिष्क्रम्याग्निमुपस-माधाय परिस्तीर्येध्मं प्रज्वाल्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमायेन्द्राय प्रजापतये बृहस्पतये विश्वेभ्योदेवेभ्यो ब्रह्मणे ऋषिभ्य ऽऋग्यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्प-तयेऽनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषये सोमाय काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्योदेवेभ्यः काण्ड-ऽऋषिभ्यः संहिताभ्यो देवताभ्य ऽउपनिषद्भ्यो याज्ञिकीभ्यो देव-

(१) 'स च ऋग्वेदस्य' इ० पा०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताभ्य ऽउपनिषद्भ्यो वारुणीभ्यो देवताभ्य ऽउपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिञ्चति समाप्ते चैता यजुषा तर्पयतीति'।

अन्ते एता'अग्निसोमाद्या' यजुषा पदेन सह तर्पयेत्।

यद्वा—'भूर्देवांस्तर्पयामि'इत्यादियजुषा तर्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः। महार्णवः—

'एवमृग्वेदिनां काण्डऽऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने 'शतर्चिभ्य' इत्यादि 'महानाम्नीभ्य' इत्यन्तं प्राग्वत्। 'ततो वेदादिमारभ्य सन्ततमधीयीत नास्यान्तराऽनध्यायो नास्यान्तरा जननमरणे अशुचिः'। आशौचं नेत्यर्थः। 'नान्तरा व्याहरेन्न विरमेद्यावन्तमधीयीत'। यावत्पर्यन्तं पठेत्तावत्पर्यन्तं न विरमेन्नान्यच्च वदेदित्यर्थः। 'यदन्तरा विरमेत् त्रीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत। ततः सर्वनिशान्तरं सङ्ग्रामारण्यसलिलं लोप्य परिदध्यात्'। निशान्तरं सन्ध्यानिशादींल्लोप्य विहाय समापयेदित्यर्थः। 'आद्यावन्ते च ब्राह्मणभोजनं दक्षिणां च दद्यात्' इति महार्णवोक्तं विधानम्॥

अथ कमलाकरः—

'य एतेन विधिना वेदमधीयीत सन्ततः पूतो वेदो भवति मनः शुद्धिश्च भवति' वेदरूपो भवतीत्यर्थः। 'द्वाभ्यां पारायणाभ्यां ऋग्भिश्चाऽभोजन इहाधीतेऽनृतेभ्यः प्रमुच्यते। त्रिभिर्बहुभ्यः पतनीयपातकेभ्यः, शूद्रायां रेतः सिक्त्वा गङ्गाऽप्सु वनिमज्यश्च भवति। चतुर्भ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च, पञ्चभिरयाज्ययाजनादग्राह्यग्रहणात्, षड्भिर्ब्राह्मणस्य लोहितकरणात्स्त्रीलोहित करणात्पशुहननात्सुवर्णस्तेयात्पतितसंयोगाच्च, सप्तभिः प्राजापत्यस्य हीनचेरणाधन्नोपबन्धनाच्चाष्टभिश्चान्द्रायणस्यान्तराऽऽचरणाद्गुरुतल्पगमनाद्रजस्वलागमनाच्च, नवभिः सुरापानाद्दशभिर्पूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गंल्लोकं गच्छति इति। अग्निष्टोमादिक्र-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुभिरिष्टं भवति, पितॄन्त्स्वर्गंल्लोकं गमयति ।'

वेदाध्यायी सदैव स्यादपाप्मा सत्यवाक् शुचिः ।
यं यं कामं कामयते तं तं वेदेन साधयेत् ॥
असाध्यं नास्ति यत्किञ्चिद्ब्रह्मणो हि फलं महत्' ।

ऋग्विधाने—

आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये ।
पुष्टये पशुलाभाय धनलाभाय भूतये ॥
एषा हि संहिता देवैः सर्वब्रह्ममयी निच्वृत् ।
उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता ॥
होमांश्च जपयज्ञांश्च नित्यं कुर्वीत वै तथा ।
सर्वकामप्रसिध्यर्थं परं ब्रह्मेदमुच्यते ॥
एषा वै प्रतिलोमोक्ता शत्रुपक्षविनाशिनी ।
अक्षरप्रतिलोमेयमभिचारेषु शस्यते ॥
सर्वसंहितया प्रत्यृचं होम आज्येन तिलेन वा ।
"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते" इति ब्राह्मोक्तेः ।
सर्वपापहरो होमस्तिलैः सर्वत्र शस्यते ॥

इति विष्णुधर्मोत्तराच्च ।

शातातपः—

कृच्छ्रो देव्ययुतं चैव वेदपारायणं तथा ।
तिलहोमसहस्रं च सममेतच्चतुष्टयम् ॥
इदं केवलम् । अन्त्ये चान्द्रमसम् ।
इति कमलाकरभट्टकृतो वेदपारायणविधिः समाप्तः ॥ १२ ॥
व्याख्या चरणव्यूहस्य आद्यखण्डस्य तेन वै ।
यथामति विरचिता महादेवप्रसादतः ॥

इति चरणव्यूहे प्रथमखण्डव्याख्यासमाप्ता ।

इति प्रथमः ऋग्वेदखण्डः समाप्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ यजुर्वेदखण्डः ।

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति, चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्त्तान्तवेया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति । तत्र मैत्रायणीया नाम षड्भेदा भवन्ति, मानवा वाराहा दुन्दुभाश्छागलेया हारिद्रवेया श्यामायनीयाश्चेति । तेषामध्ययनं ।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
ऋग्गणः परिसङ्ख्यातं ततोऽन्यानि यजूंषिच ।

अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकञ्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणं । तत्र तैत्तिरीयका नाम द्विभेदा भवन्त्यौखेयाः खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्चभेदा भवन्ति, कालेता शाट्यायनी हैरण्यकेशी भारद्वाज्यापस्तम्बीचेति । तेषामध्ययनमष्टादशयजुःसहस्राण्यधीत्यशाखापारो भवति, तान्येव द्विगुणान्यधीत्यपदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति, षडङ्गान्यधीत्य षडङ्गविद्भवति ।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि ।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

तथा प्रतिपदमनुपदं छन्दो भाषाधर्मो मीमांसान्यायस्तर्क इत्युपाङ्गानि । तत्र परिशिष्टानि भवन्ति, यूपलक्षणं छागलक्षणं प्रतिज्ञाऽनुवाकसङ्ख्याचरणव्यूहश्राद्धकल्पशुल्वकानि पार्षदमृग्यजूंषीष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्या निगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति । तत्र कठानां योगा येन विशेषस्तत्र प्राच्योदीच्यनैर्ऋत्यवाजसनेया नाम पञ्चदश भेदा भवन्ति, जाबाला बौद्धायनाः काण्वा माध्यन्दिनेयाः शाफेयास्तापनीयाः कपोलाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया वैधेया अद्धा बौधेयाश्चेति । तेषामध्ययनं सौक्तिकं प्रवचनीयाश्चेति ।

मन्त्रब्राह्मणकल्पानामङ्गानां यजुषामृचाम् ।
षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते ॥१॥

अथ द्वितीयखण्डं व्याख्यायते—

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । अत्र शाखाभेदो ग्राह्यः । षट् अशीतिर्भेदा इत्यर्थः । तत्र चरकाणां द्वादश भेदा भवन्तीति स्पष्टार्थः । ते के भेदाः ? चरकाः, आह्वरकाः, कठाः, प्राच्यकठाः, कपिष्ठलकठाः, आरायणीया, वारायणीया, वार्त्तान्तवेया, श्वेताश्वतरा, औपमन्यवः, पाताण्डनीया, मैत्रायणीयाश्चेति । मैत्रायणीयानां षट् भेदा भवन्ति । मानवा, दुन्दुभा, वाराहका, (१) छागलेया, हारिद्रवेया, श्यामायनीयाश्चेति । इति षट् मैत्रायणीयशाखागणा इत्यर्थः । मैत्रायणीयानां केचित्सप्त भेदा भव-

(१) 'एकेया' इ० पा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्ति इति वदन्ति 'श्यामा' इत्यधिकं तदधिकमेव । मैत्रायणीयस्तु वाजसनेयवेदाध्यायी । मानवं कल्पसूत्रम् । तेषामध्ययनमष्टोत्तरशतं यजुः सहस्राण्यधीत्य शाखापारो भवति । तेषामध्ययने द्विचत्वारिंशदध्यायाः । अष्टशताधिकसहस्रमन्त्रा इत्यर्थः । तान्येव द्विगुणान्यधीत्य पदपारो भवति, द्विवारपठनात्पदपारायणफलं भवतीत्यर्थः । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति, त्रिवारपठनात्क्रमपारायणफलं भवतीत्यर्थः । पदक्रमाध्ययनं भवतीत्यर्थः ।

'षडङ्गान्यधीत्य षडङ्गविद्भवति' तानि कानि षडङ्गानि ? उच्यन्ते—

शिक्षादीनि षडङ्गानि भवन्ति । षडुपाङ्गान्यपि प्रतिपदादितर्कान्तानि भवन्ति । तस्मिन्यजुर्वेदे यूपलक्षणादि—कूर्मलक्षणान्तान्यष्टादश परिशिष्टसूत्राणि भवन्ति । एतेषां व्याख्यानान्यग्रे वक्ष्यामः । तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यस्तत्र वाजसनेयानां पञ्चदशभेदा भवन्ति । प्राच्य उदीच्य नैर्ऋत्येषु तिसृषु दिक्षु वाजसनेयवेदोत्पत्तिरग्रे वक्ष्यामः । इतरदेशेषु वेदशाखयोर्विभाग उच्यते । तच्च महार्णवे—

पृथिव्या मध्यरेखा च नर्मदा परिकीर्तिता ।
दक्षिणोत्तरयोर्भागे शाखा वेदाश्च उच्यते ॥ १ ॥
नर्मदादक्षिणे भागे आपस्तम्ब्याश्वलायनी ।
राणायनी पिप्पला च यज्ञकन्याविभागिनः ॥ २ ॥
माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा ।
नर्मदोत्तरभागे च यज्ञकन्याविभागिनः ॥ ३ ॥
तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि ।
आ आन्ध्रदेशपर्यन्तं बह्वृचश्चाश्वलायनी ॥ ४ ॥
उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः ।
कौषीतकीब्राह्मणं च शाखा शाङ्खायनी स्थिता ॥ ५ ॥
आन्ध्रादि दक्षिणाग्नेयी गोदा सागरआवधि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यजुर्वेदस्तु तैत्तिर्य आपस्तम्बी प्रतिष्ठिता ॥ ६ ॥
सह्याद्रिपर्वतारम्भादिशां नैर्ऋत्यसागरात् ।
हिरण्यकेशी शाखा च पर्शुरामस्य सन्निधौ ॥ ७ ॥
मयूरपर्वताच्चैव यावद्गुर्जरदेशतः ।
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता ॥ ८ ॥
अङ्गवङ्गकलिङ्गश्च कानीनो गुर्जरस्तथा ।
वाजसनेयी शाखाच माध्यन्दिनी प्रतिष्ठिता ॥ ९ ॥
ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता ।
वाजसनेयवेदस्य प्रथमा काण्वसञ्ज्ञका ॥ १० ॥ इति ।

व्यासशिष्यो वैशम्पायनो निगदाख्यं यजुर्वेदं पठित्वा शिष्याश्चकार । तच्च भागवते—

वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम् ॥ १ ॥
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥ २ ॥
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥ ३ ॥
देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ४ ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ।
तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥ ५ ॥
याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यधिगवेषयन् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६ ॥

याज्ञवल्क्य उवाच—'ओं नमो भगवते आदित्याय' इत्यारभ्य(१)'यातयामयजुःकाम उपसरामि' इत्यन्तं तुष्टाव । सूत उवाच—

(१) जीर्णभुक्ते, उच्छिष्टे, 'वान्ते यातयामश्शब्द इति निघण्टुः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७ ॥
यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ॥ ८ ॥

इत्यादि ग्रन्थपर्यालोचनया यजुर्वेदत्यागानन्तरं देवरातसुतेन अब्राह्मणत्वभिया सविता सूर्यो वाजिरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्तास्त्यक्ताः शाखा वाजसनेयी सञ्ज्ञा । शाखारण्डत्वपरिहारार्थं चातुर्वेद्यत्वसङ्ख्यासंरक्षणार्थं च वाजिरूपेण सूर्येणायातयामानि यजूंषि मुनये दत्तानि तैर्यजुर्भिरुपरतैः स मुनिस्ताः वाजसन्यः पञ्चदशशाखा अकरोत् । तस्माच्च मुनेः सकाशात्काण्वा माध्यन्दिनादय अध्ययनं चक्रुः । ते पञ्चदश भवन्ति । अथ प्रसङ्गाद्यजुर्वेदस्य शाखाप्रणयनविचारः किञ्चिदुच्यते । तत्र यजुर्वेद एव प्रथमः ।

तथा च विष्णुपुराणे—

एक एव यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत् । इति ।

यजुर्वेदो यज्ञोपयोगित्वरूपयोगात्सर्वोऽपि वेदो यजुर्वेद इत्युच्यते । यजुर्वेदस्य शाखाभेदं सविस्तरमाह—

यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥ १ ॥
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।
याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातसुतो द्विज ॥ २ ॥
शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा ।
ऋषिर्योऽद्य महामेरोः समाजे नागमिष्यति ॥ ३ ॥
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ।
पूर्वमेवं मुनिगणैः समयो यः कृतो द्विज ॥ ४ ॥
वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्रीयं बालकं सोऽथ पदघृष्टमघातयत् ॥ ५ ॥
शिष्यानाह स भोः शिष्या ब्रह्महत्यापहं व्रतम् ।
चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ ६ ॥
अथाह याज्ञवल्क्यस्तु किमेतैर्बहुभिर्द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥ ७ ॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् ।
मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानक ॥ ८ ॥
निस्तेजसो वदस्येनान्यत्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥ ९ ॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाऽधीतं यन्मया तदिदं द्विज ॥ १० ॥

श्रीपराशर उवाच—

इत्युक्तो रुधिराक्तानि सरूपाणि यजूंषि सः ।
छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥ ११ ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज ।
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ततः स्मृताः ॥ १२ ॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु तैः ।
(१)चक्रुराध्वर्यवं ते तु चरणान्मुनिसत्तम ॥ १३ ॥
याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषंस्ततः ॥ १४ ॥

अस्यार्थः-'यजुर्वेदतरोः' इत्यादिना सप्तविंशतिः । इयं च प्रधानशाखानां सङ्ख्या । ब्रह्माण्डपुराणोक्तषडशीतिशाखाभेदस्तु प्रतिशाखाविवक्षया ताश्च शुक्लयजुः पञ्चदशकं सहेत्येकशाखा आपस्तम्बोक्ता इति द्रष्टव्यम् । याज्ञवल्क्येन छर्दितैर्यैर्यजुर्भिस्तैत्तिरीयशाखा बभूव । ते याज्ञवल्क्यव्यतिरिक्ता वैशम्पायनशिष्या याज्ञव-

(१) 'चरकाध्वर्यवः', 'वरकाध्वर्यवः' इ० पा० च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल्क्येन छर्दितं विप्ररूपेण ग्रहीतुमनुचितमिति तित्तिरपक्षिणो भूत्वा याज्ञवल्क्यविसृष्टानि यजूँषि जगृहुः। ततस्ताः शाखास्तैत्तिरीया बभूवुरित्यर्थः। याज्ञवल्क्यव्यतिरिक्तानां चरकाध्वर्युसञ्ज्ञां निर्वक्ति—

चरकाध्वर्यवस्ते वै चरणान्मुनिसत्तम।

'चरकाध्वर्यव' इति पाठे चरणाद्यजुषां ग्रहणात्। आध्वर्यवं चक्रुरित्यर्थः। यजूँषि वैशम्पायनेनाधीतानि।

याज्ञवल्क्यस्ततो ब्रह्मञ्छन्दांस्यधिगवेषयन्।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम्॥ इति भागवतोक्तेः।

याज्ञवल्क्य उवाच—

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे।
ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः॥ १५॥

इत्यादि 'पराशर उवाच' इत्यन्तां स्तुतिं कृत्वा—

इत्येवमादिभिस्तेन स्तूयमानः स वै रविः।
वाजीरूपधरः प्राह व्रियतामभिवाञ्छितम्॥ १६॥
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम्।
यजूँषि तानि मे देहि यानि सन्ति न मे गुरौ॥ १७॥

पराशर उवाच—

एवमुक्तो ददौ तस्मै यजूँषि भगवान् रविः।
अयातयामसञ्ज्ञानि यानि वेत्ति न तद्गुरुः॥ १८॥
यजूँषि यैरधीतानि तानि विप्रैर्द्विजोत्तम।
वाजिनस्ते समाख्याताः सूर्योऽश्वः सोऽभवद्यतः॥ १९॥
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्।
काण्वाद्यास्तु महाभागा याज्ञवल्क्यप्रवर्त्तिताः॥२०॥ इति।

तद्गुरुवैशम्पायनो यानि न वेत्ति तेषां व्यासेनानुपदिष्टत्वादिति भावः। वाजिनः समाख्याता वाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वात्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निपुराणेऽपि—

काण्वामाध्यन्दिनीसञ्ज्ञा कठी माध्यकठीतथा ।
मैत्रायणीयसञ्ज्ञा च तैत्तिरीयाभिधानका ॥ १ ॥
वैशम्पायनिकेत्याद्याः शाखा याजुषसञ्ज्ञिता । इति ।

आदिशब्देन एतदन्यशाखाग्रहणम् । तदुक्तं नृसिंहपराशरे—

प्रथमो याज्ञवल्क्यश्च आपस्तम्बो द्वितीयकः ।
तृतीयो मूलघटकश्चतुर्थो वाणसः स्मृतः ॥ १ ॥
पञ्चमः सहवासश्च षष्ठः स्याद्गोत्रपण्डितः ।
रामानुजः सप्तमोक्त अष्टमश्च गयावलः ॥ २ ॥
त्रिदण्डो नवमः प्रोक्तो नवशाखाः प्रकीर्त्तिताः ।
तन्मध्ये सहवासस्तु कर्मनिष्ठो द्विजाग्रणीः ॥ ३ ॥
एवं शाखादेशभेदाद्बहवस्तु द्विजातयः ।
तत्रापि कर्मनिष्ठाश्च ग्राह्या यज्ञादिकर्मसु ॥ ४ ॥
हीना द्विजातयः सर्वे त्याज्याः सर्वत्र कर्मसु ।

हीना द्विजातयः–अभीरादयः । परदेशे त्रिदण्डवेषधारिणः सन्यासिनः स्वग्रामे परिग्रहयुक्तास्ते त्रिदण्डिनः । गोत्रपण्डितो-वैश्ययाजकः । मूलघटको—नागवल्लीरोपकः । निर्मूला इति प्रसिद्धाः । अन्ये वाणसादि प्रसिद्धाः । केचिद्धर्मशास्त्रानभिज्ञा वानप्रस्थाज्जाता 'वाणसा' इति वदन्ति । तद्वाक्यमारूढपतित-परम् । तदुक्तं कूर्मपुराणे वानप्रस्थाश्रमधर्मे—

यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः ॥
तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः ।
न हि वेदेऽधिकारोऽस्य तद्वंशोऽप्येवमेव हि ॥
आरूढपतितः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः । इति ।

वाजसनीयवेदोत्पत्तिरित्यर्थः । जाबाला, बौधायनाः,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काण्वाः, माध्यन्दिनेयाः, शाफेयाः, तापनीयाः, कपोलाः, पौण्ड्रवत्साः, आवटिकाः, परमावटिकाः, पाराशराः, वैणेयाः, वैधेयाः, अद्धाः, बौधेयाः इति पञ्चदशशाखा इत्यर्थः। 'प्रतिपदमनुपदम्' प्रतिपदे अनुपदं अल्पपदं कर्त्तव्यमित्यर्थः। 'छन्दः' छन्दोरत्नाकरादि। 'भाषा' शब्द परिभाषा। 'धर्मः' धर्मशास्त्रं मिताक्षरादि। 'मीमांसा' प्रसिद्धा। (जैमिनिमहर्षिकृतमध्यायद्वादशकम्।) 'न्यायस्तर्कः' न्यायशब्देन काणादसूत्रम्। तर्कशब्देन गौतमसूत्रम्। इति षडुपाङ्गानि। उपज्योतिषं-ज्योतिःशास्त्रम्। साङ्गलक्षणं सामुद्रिकादि। यूपलक्षणं, छागलक्षणं च यज्ञे प्रसिद्धम्। प्रतिज्ञासूत्रं खण्डत्रयात्मकम्। अनुवाकाध्यायः। वेदशाखापरिज्ञानार्थं चरणव्यूहसूत्रम्। श्राद्धसूत्रं नवखण्डात्मकम्। श्रौतयज्ञार्थमण्डपरचनात्मकं शुल्बसूत्रम्। पार्षदपरिशिष्टसूत्रम्। ऋग्यजुर्निर्णयात्मकं ऋग्यजुःपरिशिष्टसूत्रम्। इष्टकापूरणपरिशिष्टसूत्रम्। गोत्रप्रवरनिर्णयार्थः प्रवराध्यायः। उक्थशास्त्रपरिशिष्टम्। क्रतुसङ्ख्या। निगम, यज्ञपार्श्व, हौत्रक, प्रसवोत्थान, कूर्मलक्षणपरिशिष्टपञ्चकं यज्ञेषु प्रयोजनं प्रसिद्धम्। एतानि परिशिष्टान्यष्टादशसङ्ख्यकानि कात्यायनमहर्षिप्रणीतानि।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके।
ऋग्गणः परिसङ्ख्यातमेतत्सर्वं सशुक्रियम्॥

वाजसनेयके वेदे नवशताधिकसहस्रमन्त्रा इत्यर्थः। एतत्सकलं सशुक्रियमन्त्रं 'ऋचं वाचम्' इति षट्त्रिंशदध्यायोक्तचतुर्विंशद्वचात्मकसहितं, मध्याह्ने शुक्लवर्णेन सूर्येण दत्तः सशुक्रयज्ञः परिसङ्ख्यात इत्यर्थः। वेदोपक्रमणे चतुर्दशीयुक्तपौर्णिमाग्रहणाच्छुक्लयजुः। प्रतिपदायुक्तपौर्णिमाग्रहणात्कृष्णयजुरिति वा। ऋक्सङ्ख्या पञ्चविंशत्युत्तरैकोनविंशतिः १९२५। खिलमन्त्राः 'अग्निश्च' इति षड्विंशत्यध्यायोक्ताः। यजुः सङ्ख्या अष्टाविंश-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्युश्चराष्टशतान्यष्टौ सहस्राणि। 'ब्राह्मणं च० चतुर्गुणम्' वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः ।

यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम् ।
तत्रापि च शिवाः शाखाः दश पञ्च च वाजिनाम् ॥
तत्रापि मुख्या विज्ञेया शाखा या कण्वसञ्ज्ञका । इति ग्रन्थान्तरे ।

तैत्तिरीयकानां द्विभेदा भवन्ति, औखेया, खाण्डिकेयाश्चेति । खाण्डिकेयानां पञ्चभेदा भवन्ति । कालेता, शाट्यायनी, हिरण्यकेशी, भारद्वाजी, आपस्तम्बीति । तेषामध्ययनपरिमाणम्—

काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिकयकाश्चतुः ।
चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् ॥ १ ॥
एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते ।
द्विसहस्रश्चैकशतमष्टानवति चाधिका ॥ २ ॥
लक्षैकं तु द्विनवति सहस्राणि प्रकीर्त्तितम् ।
पदानि नवतिश्चैव तथैवाक्षरमुच्यते ॥ ३ ॥
लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम् ।
अष्टषष्ट्याधिकं चैव यजुर्वेदप्रमाणकम् ॥ ४ ॥

काण्डाः ७ । प्रश्नाः ४४ । अनुवाकाः ६५१ । पञ्चाशी-२१९८ । पदानि १९२०९० । अक्षराणि २५३८६८ ।

शाखावाक्यान्ययुतानि सहस्राणि नवानि च ।
चतुः शतान्यशीतिश्च अष्टौ वाक्यानि गण्यते ॥ १ ॥

इति ब्राह्मणे अष्टौ वाक्यसङ्ख्या १९४८० । इति तैत्तिरीयनिगदस्वेदाख्यसङ्ख्योक्ता इत्यर्थः । तत्र कठानां तूपगायतुचतुश्चत्वारिंशदुपग्रन्थाः ।

मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ।
यजुर्वेदः सविज्ञेय अन्ये शाखान्तराः स्मृताः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुश्चत्वारिंशदुपग्रन्थाः। अध्यायाः समीपे उक्ताश्चत्वारिंशत् । मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोर्मन्त्रब्राह्मणयोः तयोश्च वेद इति सञ्ज्ञा । तदुक्तं–'मन्त्रब्राह्मणयोर्वेद इति नामधेयम्' इत्यृक्शाखीयप्रातिशाख्यभाष्यकारेणोव्वटेन आपस्तम्बसामान्यसूत्रभाष्यकारेण कपर्दिना धूर्त्तस्वामिना च । तथा च सति मन्त्रो नाम संहितामन्त्रस्तादृङ्मन्त्ररूपसंहितायास्तन्मध्ये एव तदग्रे ब्राह्मणत्वेन पठनमित्युभयथाऽपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणं पठनमिति 'स मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते' इत्यर्थः। एतादृशपठनं शाखाया अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति। तथा हि सम्पश्यामि—"प्रजाऽअहमिह प्रजासो मानवीः" इति संहितामन्त्रः। एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव सम्पश्यामि—"प्रजाऽअहमित्याह यावन्त एवेति" ब्राह्मणमित्युभयोरपि संहितात्वेन पदत्वेन क्रमत्वेन पठनं त्रिगुणितं पठनं भवति। एतादृशमुदाहरणान्तरमाह—"इमामगृभ्णन्रशनामृतस्य पूर्वऽआयुषिविदथेषु"इति संहितामन्त्रः। एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव संहितारूपेण वर्तते। तत्कथम् ? इत्यपेक्षायामाह—"इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त" इति ब्राह्मणम्। अनयोरपि त्रिगुणत्वेन पठनम्।"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय" इति त्रिगुणत्वेन पठनं भवति। एते त्रिगुणाः कस्यापि शाखायां न भवन्ति किन्तु गाथा सङ्ग्रन्थत्वात् । एवमन्यान्यपि बहूनि वाक्यानि सन्ति तानि विस्तरभयान्नोक्तानि। अतः कारणात् 'अन्ये शाखान्तराः स्मृताः। तेषामध्ययनं प्रवचनीयाश्चेति' एतेषां शुक्लकृष्णयजुषां पठनं प्रवचनीयाः प्रतिवचनत्वेन आर्षीयपाठत्वेन च समाम्नमित्यर्थः।

अन्यान्यपि पुराणवाक्यानि सङ्गृहीतानि—

अग्निमीडेनमस्तुभ्यमिषे त्वोर्ज्जे'लसत्तनुः ।
अग्नऽआयाहिवीतये शन्नो देवी स्वरूपवान् ॥ १ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इषे त्वोर्ज्जे यजुर्वेदशब्दः पुरुष एव च ।
नभश्च पूर्णिमासूर्य उदयव्यापिनी तथा ॥ २ ॥
सङ्गृह्यमाणश्च यो वेदं प्रतिवर्षे व्रतं चरेत् ।
यातयामनिवृत्त्यर्थं छन्दस्य च विशेषतः ॥ ३ ॥
तस्योष्णिक्छन्दलोमेषु गायत्री च त्वचा स्मृता ।
मांसेषु त्रिष्टुभं विद्यादनुष्टुप्रुधिरः स्मृतः ॥ ४ ॥
अस्थीषु जगती चैव मज्जासु पङ्क्तिरेव च ।
प्राणेषु बृहती छन्दो यजुर्वेदस्य लक्षणम् ॥ ५ ॥

एतदर्थं ऐतरेयश्रुतिः—"शुक्लकृष्णकनीनिकेति स यदि ह वाऽअपि मृषा वदति य ऽएवमेतं छन्दसां छन्दस्त्वं वेद" इत्यन्तम् ।

पुण्याहवाचने मन्त्रान् प्रोक्षणे कङ्कणस्य च ।
सभायां ब्रह्मयज्ञे च इषे त्वोर्ज्जे यजुः पठेत् ॥ १ ॥
शाङ्खायनं ब्रह्मयज्ञे इषे त्वोर्ज्जे यजुः स्मरेत् ।
श्रौते स्मार्त्ते च पूर्त्ते च सर्वकर्मसु योजितः ॥ २ ॥
ऋग्यजुः सामाथर्वांश्च सभायां कुण्डमण्डपे ।
ब्रह्मयज्ञे प्रतिसरे पठेद्वै स्वस्तिवाचने ॥ ३ ॥
अन्यत्र समुदायश्च प्रायश्चित्ते सभासु ते ।
यजुर्वेदोपनिषदे मन्त्राः शाकलसञ्ज्ञकाः ॥ ४ ॥
उपदिष्टाः शौनकेन आत्मशिष्याय शाकले ।
तेषां शाकलमन्त्राणां यजुःसञ्ज्ञा समीरिता ॥ ५ ॥
यस्य वेदे शाकलमन्त्राः तस्य यजुःसञ्ज्ञा इत्यर्थः ॥१॥
व्याख्या चरणव्यूहस्य यजुःखण्डस्य तेन वै ॥
विस्तारिता यथा बुद्धि महादेवप्रसादतः ॥

इति चरणव्यूहे द्वितीयखण्डव्याख्या समाप्ता ।

इति द्वितीयः यजुर्वेदखण्डः समाप्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सामवेदखण्डः ।

सामवेदस्य किल सहस्रभेदा आसीदनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः प्रनष्टाः । शेषान् प्रवक्ष्यामि—असुरायणीया वासुरायणीयाः वार्तान्तरेयाः प्राञ्जलऋग्वैनविधा प्राचीनयोग्याः राणायनीयाश्चेति । राणायनीया नाम नव भेदा भवन्ति—राणायनीयाः शाट्यायनीयाः सात्यमुद्गलाः खल्वला महाखल्वला लाङ्गलाः कौथुमा गौतमा जैमिनीयाश्चेति । तेषामध्ययनमशीतिशतमाग्नेयं पावमानं चतुः शतमैन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगास्तान्यधीत्य चण्डात्प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाऽऽविंशतिको भवति । तत्र केचित्पुनर्ऋक्तन्त्रं सामतन्त्रं सञ्ज्ञाधातुलक्षणमितिविधीयन्ते ।

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
अष्टौ शतानि नवतिर्दशतिर्वालखिल्यकम् ।
सरहस्यं ससुपर्णं प्रेक्ष्यस्तत्र वालखिल्याः ।
सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम् ॥१॥

अथ तृतीयखण्डो व्याख्यायते—

सामवेदस्येति । किलेति प्रसिद्धौ सहस्रभेदा आसीत् । सहस्रभेदमध्ये शक्रेण वज्रेणाभिहताः प्रणष्टाः ।

अनध्यायेष्वधीयाना म्रीयन्ते विद्युताः खलु । इति ।

शेषान् शाखापाठकान्व्याख्यास्यामः । असुरायणीया, वासुरायणीया, वार्त्तान्तरेया, प्राञ्जलऋग्वैनविधाः, प्राचीनयोग्याः, राणायनीयाश्चेति । तत्र राणायनीयानां नव भेदा भवन्ति । राणायनीयाः, शाट्यायनीयाः, सात्यमुद्गलाः, खल्वलाः,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाखल्वलाः, लाङ्गलाः, कौथुमा, गौतमा, जैमिनीयाश्चेति। तेषामध्ययनम्। अष्टौ सामसहस्राणि सामानि च चतुर्दशान्यष्टौ शतानि दशाभिर्दशसप्तसु वालखिल्यः सुपर्णः प्रेक्ष्यमेतत्सामगणं स्मृतम्। अथ प्रकारान्तरेणाह-तत्र राणायनीयानां सप्त भेदा भवन्ति। राणायनीयाः, सात्यमुग्राः, कालेयाः, महाकालेयाः, लाङ्गलायनाः, शार्दूलाः, कौथुमाश्चेति। तत्र कौथुमानां षड्भेदा भवन्ति। कौथुमाः, आसुरायणाः, वातायनाः, प्राञ्जलिद्वैनभृतः, प्राचीनयोग्याः, नैगमीया इति। तेषां कौथुमादीनामध्ययनम्।

अशीतिशतमाग्नेयं पावमानं चतुः शतम्।

ऐन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगास्तानि सूक्तान्यधीत्य चण्डादुत्कृष्टाचे चण्डतरा अत्युत्कृष्टा भवन्ति। शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टाऽऽविंशतिको भवति। शिष्टान् प्रामाणिकान् आविंशतिशिष्टेषु वा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूरकाः सर्वश्रेष्ठो भवतीत्यर्थः। तत्र सूक्तेषु केचित् मन्त्रतन्त्रा इति मन्त्राश्चतुर्द्धा विधीयन्ते। तदाहाचार्यः-ऋक्तन्त्रम्, सामतन्त्रम्, सञ्ज्ञालक्षणम्, धातुलक्षणमिति। इदानीं सामसङ्ख्यामाह—

अष्टौ सामसहस्राणि सामानि च चतुर्दश।
अष्टौ शतानि नवतिर्दशतिर्वालखिल्यकम्॥
सरहस्यं ससुपर्णप्रेक्ष्यं तत्सामदर्पणम्।
सारण्यकानि सौर्याण्येतत्सामगणं स्मृतम्॥

अशीतिशतमाग्नेयम् १८०। पावमानम् १०४। ऐन्द्रन्तु २६। शिष्टाः २८ गणानां पूरकाः। 'अष्टौ सामसहस्राणि' इत्यस्यार्थोऽङ्कतो ज्ञातव्यः ८८१४। अन्यशाखासङ्ख्यामाह—'नवतीति'। सुपर्णप्रेक्षः कश्चिच्छाखाभेदः तेन सह वर्त्तमानः ससुपर्णप्रेक्षः सुपर्णप्रेक्षेण सहितो वालखिल्यः शाखाभेदः। नवतिः नवतिसङ्ख्या-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काः दशतयो यस्मिन् स नवतिदशतिः। दशतिरिति। दशसङ्ख्या सञ्ज्ञा दशगुणा नवतिरित्यर्थः। अङ्कतोऽपि ९००। 'सारण्यकानि' आरण्यकेनोपनिषद्भागेन सह वर्त्तमानानि सौर्याणि सूर्यदेवत्यानि सूक्तानि। तत्र वालखिल्यशाखायामेव–आरण्यकं सूर्यसूक्तं सुपर्णमेक्षवालखिल्यानि मिलित्वा नवशतानीत्यर्थः। निगमयन्ति–एतत् पूर्वोक्तसामसमूहः स्मृतं कथितम्। गणशब्दस्य वलीयस्त्वं छान्दसम्। आसां षोडशशाखानां मध्ये तिस्रः शाखा विद्यन्ते। ताश्च गुर्जरदेशे कौथुमी प्रसिद्धा। कार्णाटके जैमिनी प्रसिद्धा। महाराष्ट्रदेशे राणायनी प्रसिद्धेति। आसां शाखानामध्यापकाचार्यास्त्रयोदशसङ्ख्याकाः। ते यथा–

राणायनी सात्यमुग्री दुर्वासा अथ भागुरिः।
भारुण्डो गोर्गुजवीर्भगवानौपमन्यवः॥ १॥
दारालो गार्ग्यसावर्णी वार्षगण्यश्च ते दश।
कुथुमिः शालिहोत्रश्च जैमिनिश्च त्रयोदश॥ २॥
इत्येते सामगाचार्याः स्वस्ति कुर्वन्ति तर्पिताः॥ इति।

अन्येऽपि भागवतद्वादशस्कन्धीयसप्ताध्यायपञ्चसप्ततितपद्यारभ्य अध्यायसमाप्तिपर्यन्तोक्ताः सामवेदप्रवर्त्तकास्ते यथा—

जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनेः।
सुमन्वां स्तत्सुतस्ताभ्यामेकैकां प्राह संहिताम्॥ ३४॥
सुकर्माऽपि च तच्छिष्यः सामवेदतरोर्महान्।
सहस्रं संहिताभेदं चक्रे साम्नां ततो द्विजः॥ ३५॥
हिरण्यनाभः कौसल्यः पौष्यञ्जिश्च सुकर्मणः।
शिष्यौ जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः॥ ३६॥
उदीच्याः सामगाः शिष्या आसन्पञ्चशतानि वै।
पौष्यञ्ज्यावन्त्ययोश्चापि तांश्चोदीच्यान्प्रचक्षते॥ ३७॥
लौगाक्षिर्लाङ्गलिः कुल्यः कुशीदः कुक्षिरेव च।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् ॥ ३८ ॥
कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ।
शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ॥ ३९ ॥

अस्यार्थः–सामगस्य जैमिनेः पुत्रः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वान्नाम ताभ्यां सुमन्तुसुमन्वभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह । सुकर्मापि तस्य जैमिनेः शिष्यो महानति प्रज्ञावान्-स्सामवेदाख्यतरोः साम्नां सहस्रसंहितारूपं भेदं चक्रे । कोसलपुत्रो हिरण्यनाभश्च पौष्याञ्जिश्च सुकर्मणः शिष्यौ सामशाखां जगृहतुः । अन्ये आवन्त्य उदीच्यश्च सामशाखां जगृहतुः, पौष्यञ्ज्यावन्त्ययोश्चापि सामगाः पञ्चशतानि शिष्या आसन् । तेषां समुदितानां मतानां नामानीति पौष्याञ्जिशिष्या लौगाक्ष्यादयो नाम्ना शतं शतं संहितां जगृहुः, हिरण्यनाभस्य शिष्यो नाम्ना कृतश्चतुर्विंशतिसंहिताः स्वशिष्येभ्य ऊचे शेषा अन्या संहिता आत्मज्ञानवानावन्त्यः स्वशिष्येभ्य ऊच इत्यर्थः ॥ १ ॥

व्याख्याचरणव्यूहस्य सामखण्डस्य तेन वै ।
विस्तारिता यथाबुद्धि महादेवप्रसादतः ।

इति चरणव्यूहे तृतीयखण्डव्याख्या समाप्ता ।

इति तृतीयः सामखण्डः समाप्तः ॥

अथ अथर्ववेदखण्डः ।

अथर्ववेदस्य नव भेदा भवन्ति । पैप्पला शौनका दान्ता प्रदान्ता औता जावाला ब्रह्मपलाशा कुनखीवेददर्शी चारणविद्याश्चेति । द्वादशैव सहस्राणि पञ्चकल्पानि भवन्ति । कल्पे कल्पे पञ्चशतानि भवन्ति, नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पः शान्तिकल्पश्चेति । तत्र वेदानामुपवेदाश्चत्वारो भवन्त्यृग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान्व्यासः स्कन्दो वा । य इमे वेदाश्चत्वारस्तेषामेकैकस्य कीदृशं रूपं वर्णविधोच्यते ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च, यजुर्वेदः पिङ्गाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रः षड्दीर्घत्वेन, सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डः कामरूपी विश्वकर्त्ता क्षुद्रकर्मा स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्र ऋग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गायत्रीछन्दो, यजुर्वेदस्य काश्यपसगोत्रमिन्द्रदैवत्यं त्रिष्टुप्छन्दः, सामवेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं जगतीछन्दोऽथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यमनुष्टुप्छन्दः॥१॥

अथ चतुर्थखण्डो व्याख्यायते—

अथर्ववेदस्येति । अथर्ववेदस्य नव भेदा भवन्ति नव शाखा भवन्तीत्यर्थः । तानाह—पैप्पला, दान्ता, प्रदान्ता, औता, जाबाला, शौनका, ब्रह्मपलाशा, कुनखीवेददर्शी, चारणविद्याश्चेति । तेषामध्ययनं द्वादशैव सहस्राणि मन्त्राणाम् । कीदृशानि पञ्चकल्पानि भवन्ति । अत्र बहुवचनाच्चे बहवः । यत्र एकवचनं स एकः । तेषामध्ययनं शाखया उच्यते । द्वादशसहस्राणि मन्त्राणां कीदृशानि ? एकस्मिन्कल्पे कल्पे पञ्चशतानि मन्त्राणाम् । कल्पान्याह—नक्षत्रकल्पः, विधानकल्पः, विधिविधानकल्पः,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संहिताकल्पः, शान्तिकल्पः इति पञ्चकल्पाः । तत्र वेदानां चत्वार उपवेदा भवन्ति । यथा-ऋग्वेदस्योपवेद आयुर्वेदः चिकित्साशास्त्रम् । यजुर्वेदस्योपवेदो धनुर्वेदो युद्धशास्त्रम् । सामवेदस्योपवेदो गान्धर्ववेदस्सङ्गीतशास्त्रम् । अथर्ववेदस्यार्थशास्त्रं नीतिशास्त्रम् शस्त्रशास्त्रं विश्वकर्मादिप्रणीतशिल्पशास्त्रम् । इति भगवान्वेदव्यासः स्कन्दः कुमारो वाऽऽह । य इमे चत्वारो वेदा उक्तास्तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः तच्चद्वर्णं सितासितादि विधः प्रकारश्चोच्यते । तत्रादौ ऋग्वेदस्वरूपमाह—

ऋग्वेदः पद्मपत्राक्षः-पद्मपत्रं कमलदलं तद्वदक्षिणी नेत्रे यस्य सः । सुविभक्तग्रीवः-सुविभक्ता रेखात्रयाङ्किता ग्रीवा यस्य सः । कुञ्चितकेशश्मश्रुः-कुञ्चितावलीमन्तः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य सः । श्वेतवर्णो । वर्णेन तु कक्कुब्वर्णो न, श्वेतवर्णः श्वेतो वर्णो यस्य सः । कीर्त्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च, तावत्साकल्येन, पञ्च वितस्तीर्भवन्ति । ह्येतत्प्रमाणमृग्वेदस्य कीर्तितमुक्तम् । वितस्तिशब्दो द्वादशाङ्गुलात्मकः । सार्द्धहस्तद्वयप्रमाणमित्यर्थः । यजुर्वेदस्वरूपमाह—

'यजुर्वेदः पिङ्गाक्षः' पिङ्गे पीते अक्षिणीयस्य सः । 'कृशमध्यस्थूलगलकपोलः' कृशं मध्ये कटिप्रदेशे यस्य सः । स्थूलौ गलकपोलौ यस्य सः । 'ताम्रवर्णः' ताम्रवदाचरितो रक्तो वर्णो यस्य सः । यद्वा कृष्णः वर्णो यस्य सः । दीर्घत्वेनोच्चत्वेन षट्प्रादेशमात्रप्रमाणं यस्य सः । 'प्रादेशस्तु प्रदेशिन्या' इत्यभिधानोक्तेः । अङ्गुष्ठप्रदेशिन्योर्विहितत्वात्प्रमाणमादेशो दशाङ्गुलः । तादृशाः षट्प्रादेशाः प्रमाणं षष्टयङ्गुलं सार्द्धद्वयहस्तमित्यर्थः । सामवेदस्वरूपमाह—

सामवेदो नित्यं स्रग्वी स्रजो माला यस्य सन्तीति स्रग्वी । "अस्मायामेधास्रजो विनिः" (अष्टा० ५अ० २ पा० १२१सू०) इति सूत्राद्विनि प्रत्ययः । नित्यं पुष्पमालाधारी । सुप्रयतः यमनियमवान् । 'शुचिवासाः'. शुचिः शुद्धं वासो वस्त्रं यस्य

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स शुद्धवस्त्रधारी । शमः शान्तिरस्यास्तीति शमी शान्तमनाः । दान्तो नियतबाह्येन्द्रियः । बृहन्महच्छरीरं यस्य सः । शमीतरोर्दण्डो यस्य सः शमीदण्डी । कातरेऽल्पेऽक्षिणी द्वे नेत्रे यस्य सः । काञ्चननयनो वा । आदित्यस्य भानोर्वर्ण इव वर्णो यस्य सः। श्वेतवर्णो वा नवारत्निप्रमाणं यस्य सः । सार्द्धचतुष्टयहस्तदीर्घ इत्यर्थः । अथर्ववेदस्वरूपमाह—

तीक्ष्णः—उग्रः । प्रचण्डः—क्रोधी । कामरूपी-कामेन रूपाणि यस्य सः, स्वेच्छारूपधारी । विश्वस्य आत्मा जीवनम् । विश्वस्य कर्त्ता स्रष्टा च उपनिषद्बाहुल्यात् । 'क्षुद्रकर्मा' क्षुद्राणि कर्माणि यस्य सः, अभिचारकृत्याप्रयोजकमन्त्रबाहुल्यात् । स्वशाखाध्यायी अथर्वणि विशेषः प्राज्ञश्च । महानीलोत्पलवर्णो वर्णेन श्यामकमल इव वर्णो यस्य सः श्यामसुन्दरः । दश अरत्नयः अकनिष्ठिकहस्तः प्रमाणं यस्य पञ्चहस्तप्रमाण इत्यर्थः । अथर्ववेदस्य रूपान्तरे पाठान्तरश्च—"श्वेतसाध्यवशी च सजलमूर्द्धनिगालवः स्वदारजुष्टः परस्त्रियाः स्तन्यपश्चेति" ।

अथ वेदानां गोत्रदेवताछन्दांस्याह-ऋग्वेदस्यात्रेयसगोत्रम् । आत्रेयाः सगोत्राः समानगोत्रा यस्य तत् । अत्रिगोत्रऋग्वेद इत्यर्थः । सोमदैवत्यं यस्य तत् । गायत्री छन्दो यस्य तत् । एवमग्रेऽपि व्याख्यातव्यम् ।अथ यजुर्वेदस्य काश्यपगोत्रम् इन्द्रदैवत्यं त्रिष्टुप्छन्दः । अथ सामवेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं जगतीछन्दः । अथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यं अनुष्टुप्छन्दः ॥ १ ॥

इति चरणव्यूहे चतुर्थखण्डव्याख्या समाप्ता ।

इति चतुर्थः अथर्ववेदखण्डः समाप्तः ।

अथ फलस्तुतिखण्डः ।

य इदं वेदानां नामरूपगोत्रं प्रमाणं छन्दोदैवतं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णं वर्णयति, अविद्यो लभते विद्यां जातिस्मरोऽथ जायते, जन्मजन्म वेदपारगो भवत्यव्रती व्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति नमः शौनकाय नमः शौनकाय।

य इदं चरणव्यूहं गर्भिणीं श्रावयेत्स्त्रियम्।
पुमांसं जायते पुत्रमृषिभिर्वेदपारगम्।
य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः।
अक्षय्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते॥
य इदं चरणव्यूहं पठेत्स पङ्क्तिपावनः।
तारयेत्प्रभृतीन्पुत्रान्पुरुषान्सप्तसप्त च।
य इदं चरणव्यूहंपठेत्पर्वसु पर्वसु।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय गच्छति।
रतिर्धृतिश्शिवाश्चयाश्चत्वारो वेदपत्निकाः।
ज्ञातव्या यज्ञकालेषु ईशानादि व्यवस्थिताः।
लक्षं तु चतुरो वेदा लक्षं भारतमेव च।
लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्यौतिषं चतुर्लक्षं तु ज्यौतिषम्॥ १॥

अथ पञ्चमखण्डो व्याख्यायते—

अथ चतुर्वेदस्य फलस्तुतिमाह—य इदमिति। यः पुमानिदं वेदानां नाम रूपं गोत्रं प्रमाणं छन्दो दैवत्यं वर्णं वर्णयति। नामादीनां द्वन्द्वैकवद्भावः। नाम ऋग्वेदादि १, रूपं पद्मपत्राक्षादि २, गोत्रमात्रेयादि ३, प्रमाणं पञ्चवितस्त्यादि ४, छन्दो गायत्र्यादि ५, दैवत्यं सोमादि ६, वर्णं श्वेतादि च ७, इत्यादि यो जानाति स अविद्यो विद्याहीनः सन्विद्यां लभते प्राप्नोति जातिस्मरोऽथ जायते। अथ जन्मान्तरे उत्तमजातिर्जायते पूर्वजातिं स्मरति। जन्मजन्म, प्रतिजन्म वेदपारगः—वेदपाठी भवति। अव्रती व्रती भवति—व्रतहीनोऽपि व्रतवान्भवति। ब्रह्मचर्यहीनो ब्रह्मचर्यफलं प्राप्नोति। 'शौनकाचार्याय नमः' इति पदावृत्तिर्ग्रन्थसमाप्त्यर्थः।

CC-0.Panini Kanya Maha Vidyalaya Collection.